RESEARCH INSTITUTE,
84, R.H. ROAD, MADRAS-4

॥ श्रीः ॥

श्रीब्रह्माण्डपुराणान्तर्गतम्

अनन्तशयनक्षेत्रमाहात्म्यं

जनादनक्षत्रापरनामक-

वल्कलक्षेत्रमाहात्म्यं च

नन्तशयनराजकीयसंस्कृतकलाशालालब्धमहोपाध्यायविरुदाभ्यां

के. पद्मनाभशास्त्रि-वे. सुब्बरायाचार्याभ्यां

संशोधितम् ।

तच्च

व्यासविलासपुस्तकालयाध्यक्षेण महोपाध्यायाहितानलेन

(विठलैत्ताळ) विष्णुशास्त्रिणा

अनन्तशयनस्थभास्करमुद्राशालायां

मुद्रयित्वा प्रकाशितम् ।


New Edition - (Copie 1000)

शा. शके १८३६.

1913.

(*Copy-Right Reserved*).

ःयम् आणकद्वादशकम्] [Price 12 annas.



Copies can be had from:-

Vithala Ithala,

Vyasavilas, Cochumatham

Chinnachalai,

TRIVANDRUM.



निवेदना ।

इदं किलानन्तशयनक्षेत्रमाहात्म्यं वल्कलक्षेत्रमाहात्म्य च मद्र-
लालङ्कारभूतैर्भाप्यमय्यङ्गारमहाशयै. स्वाश्रितजनसम्माननाय के-
परिमितसङ्ख्याकं ग्रन्थाक्षरैर्मुद्रापितमखिलानामेतत्पठनसमुत्सुका-
भिलाषपूरणाय नालमभूदित्यस्माभिरत्रत्यराजकीयग्रन्थशालातोऽन्य-
समासादितं मातृकापञ्चकमवलम्ब्य, हृद्यललितान् सङ्कृत्य पाठ
न्, संशोध्य च यथामति प्रकटनपदवीमध्यारोपि। ग्रन्थाक्षरैर्मुद्रिते
नलक्षेत्रमाहात्म्ये दृश्यमानमध्यायविच्छेदादिकम्, अन्तिमेऽध्याये
न्तरमहिमवर्णनपरं पद्यजातं च मातृकान्तरेऽप्यदर्शनात् प्रकृता-
ज्ञसत्वप्रतिभानाच्च परित्यक्तमस्माभिः ।

पद्मनाभक्षेत्रान्तर्वर्तिनः श्रीकृष्णविग्रहस्यैतद्वक्ष्यिमाण्डलपूर्वभूपा-
केनचित् पराजितस्य सामन्तनृपतेर्नगरादानीय स्थापितत्वेना
नेकत्वान्नोपलभ्यते तद्वृत्तवर्णनमत्र माहात्म्ये । अनयैव रीत्या श्री-
नाभस्य शेषभोगशायिनो दक्षिणहस्तस्याधोभागे दृश्यमानं शिव
ङ्गमप्याधुनिकेन केनचित् स्थापितमिति शक्यते निश्चेतुम् । तदा-
गुण्येन च श्रूयते वृद्धपरम्परापवाद ईदृश —प्रतिदिनं युगपद
ब्रविष्णुरुद्रात्मकमूर्तित्रयदर्शनसमुत्सुक कश्चन पूर्वभूप: स्व-
ङ्गमधोभागे पद्मनाभदक्षिणहस्तस्य स्थापयामासेति । शिवभक्तास्तु

केचन 'लिङ्गरूपिणं महादेवं पद्मनाभः स्वयं पूजयती'ति, विष्णुभक्ताश्च 'भस्मासुराद् भीतस्यात एव शरणार्थिनो रुद्रस्याभयप्रदानमत्र पद्मनाभेन क्रियत' इति च बहुधा स्वस्वमतावष्टम्भकपुराणकथाः समुदाहरन्तो न क्षमन्ते शिवलिङ्गस्याधुनिकत्वप्रवादम् । वस्तुतत्त्वं तु स एव जानीते भगवान् पद्मनाभः ।

श्रीमद्रजतपीठक्षेत्रमाहात्म्यमस्माभिः पुरुत् प्रकाशितम्, इदं च माहात्म्यद्वयमचिरेणैव भाषान्तरानुवादेन प्रकाशनीयमित्यपि ज्ञायते केषाञ्चिदभिलाषः । तदभ्यर्थनानुसारेण च तत्र प्रवर्तमानानाम्माकं सफलीकुर्यात् समुद्यममचिरेणैव भगवान् श्रीपद्मनाभः ।

अत्र च मर्त्यसाधारणादनवधानाद् लिपिसंयोजकदोषाद्वा प्रसक्तं प्रमादं शोधयन्तु बोधयन्तु च गुणैकपक्षपातिनो महाजनाः । इति

अनन्तशयनम्
प्रमादीचनामसंवत्सरे
आषाढबहुलतृतीयायाम

संशोधकौ:
के. पद्मनाभशास्त्रि- वे. सुब्बरायाचार्यौ
महोपाध्यायौ.

अध्यायकथासंग्रहः।

अनन्तशयनक्षेत्रमाहात्म्ये—

प्रथमाध्याये— आनर्तदेशे परमात्मसंदर्शनेच्छया चिरात् तपस्यतस्तौलवस्य दिवाकराख्यस्य यतेः पुरतो बालरूपधारिणो भगवतः प्रादुर्भावः।

द्वितीयाध्याये— पार्वतीपरमेश्वरविवाहोत्सवे लोकत्राणाय हिमालयाद् दक्षिणाम्बुधितीरं प्रत्यगस्त्यस्य प्रस्थापनं, तत्र च मलय-महेन्द्र-त्रिकूट-ताम्रपर्णीभिः सहागस्त्यस्य तपश्चरणवर्णनं, तेषां दिवाकरयतेश्च युगपदनुग्रहेच्छया आनर्तदेशाद् दिवाकरानुयानस्य भगवतो दक्षिणाब्धितीरेऽनन्तारण्यप्राप्तिश्च।

तृतीयाध्याये— वृक्षात्मनावस्थितस्य भगवतः पादादिकेशान्तवर्णनम्।

चतुर्थाध्याये— दिवाकरकृता भगवत्स्तुतिः।

पञ्चमाध्याये— अगस्त्यकृता भगवत्स्तुतिः।

षष्ठाध्याये— मलय-महेन्द्र-त्रिकूट-ताम्रपर्णीभिः कृता भगवत्स्तुतयः।

सप्तमाध्याये—अगस्त्यादिभ्यो वरप्रदानम्।

अष्टमाध्याये— दिवाकरयतये वरप्रदानं. तदभ्यर्थनया भगवतः सङ्कुचितरूपस्वीकारः, भगवत्कृतः स्वाराधनप्रकारोपदेशश्च।

नवमाध्याये— नरसिंहप्रादुर्भावकथोपयोगितया प्रह्लादचरितवर्णनम् ।

दशमाध्याये- आद्यनन्तक्षेत्रमाहात्म्यम् ।

एकादशाध्याये— तीर्थक्षेत्रमहिमवर्णनम् — पद्मतीर्थादिप्रधानतीर्थाष्टकमहिमा, तत्प्रसङ्गतोऽनन्तचतुर्दशीव्रतमहिमा, तत्कथा, आग्नेयादितीर्थान्तरमहिमा. फलश्रुतिश्च ।

वल्कलक्षेत्रमाहात्म्ये—

प्रथमाध्याये— ब्रह्मसभायां ब्रह्मणा स्वाधिक्षेपकेभ्यो नवभ्यः प्रजापतिभ्यः शापदानप्रकारः, शापकालातिवाहनाय नारदेन सह तेषां मन्त्रणं, नारदोपदेशेन तेषां वल्कलक्षेत्रावासिश्च ।

द्वितीयाध्याये— वल्कलक्षेत्रे चिन्ताकुलानां स्नानाद्यर्थं जलमाकांक्षतां च तेषां वृद्धविप्ररूपधारिणा नारदेन भाविचक्रतीर्थवृत्तनिवेदनेन समाश्वासनम् ।

तृतीयाध्याये — नारदस्य वैकुण्ठगमन, तत्स्तोत्रतुष्टेन भगवता चक्रतीर्थनिष्पादनाय चक्रायुधप्रेषणं, निष्पन्ने चक्रतीर्थे स्नात्वा तपश्चरतां प्रजापतीनां शापान्मुक्तिश्च ।

चतुर्थाध्याये— लोकपरित्राणायावतरिष्यमाणस्य भगवतो दाशरथे रावणवधानन्तरं मन्त्रपूतेन पयसाभिषेचनाय ब्रह्मणः समुद्यमः, तद्योग्ययजनस्थलान्वेषणं, तदा नारदेन वल्कलक्षेत्रस्य तदुचितत्वप्रतिपादनं च ।

पञ्चमाध्याये- नारदवचनेन भुवमागत्य ब्रह्मणो यागारम्भः, तत्र च गर्वनिरसनपूर्वकमनुजिघृक्षोर्विप्ररूपधारिणो जनार्दनस्याविर्भावः, ब्रह्मस्तुतितुष्टस्य भगवतो लोकैरनुष्ठीयमानानां कर्मणां सफलतायै स्वसमर्पणनियोगश्च ।

षष्ठाध्याये- यागसमापन, तदानीं च रावणं हत्वायोध्यां प्रति प्रस्थितस्य रामस्यानयनाय भृगोः प्रेषणम्, अभिषेकतीर्थमादायायोध्यां प्रत्यागमने रामस्याज्ञा च ।

सप्तमाध्याये - पापविनाशतीर्थमहिमा, अयोध्यायां परमेष्ठिकृतं रामाभिषेचनं च ।

अष्टमाध्याये - क्षेत्रयात्राविधिः, फलश्रुतिश्च ।

शुद्धिपत्रम्

पृष्ठं	पङ्क्तौ	अशुद्धम्	शुद्धम्
८	१	त्वस	त्वत्स
२२	२	तदाश्धय	तदाश्रय
६६	१३	मसुनो	सुमनो
९१	१२	व्यः	व्यं
९६	८	थत्ते	धत्ते
१३८	१२	त्वया	स्त्वया

84, R. H. ROAD, MADRAS-4

॥ श्रीः ॥

श्रीमदनन्तपद्मनाभाय नमः ।

श्रीमदनन्तशयनक्षेत्रमाहात्म्यम् ।

प्रथमाऽध्यायः ।

अनन्तभोगपर्यङ्के शयानं क्षीरसागरे ।
नौमि सुन्दरराजं तं श्रीवराहतनुं हरिम् ॥ १ ॥
सुपुण्ये नैमिशारण्ये मुनयः शौनकादयः ।
सत्रं समासत समाः सहस्रं हरितुष्टये ॥ २ ॥
प्रातःसवनहोमान्ते कदाचिच्छौनकादयः ।
सत्कृतं सूतमासीनं पप्रच्छुरिदमुत्सुकाः ॥ ३ ॥
मुनय ऊचुः--
व्यासशिष्य महाप्राज्ञ सर्वशास्त्रार्थकोविद ।
शुश्रूषतामुत्सुकानामेतदाख्याहि नः शुभम् ॥ ४ ॥
अनन्तशयनं नाम दक्षिणाम्बुनिधेस्तटे ।
यत्र शेते स्वयं विष्णुर्दर्शनान्मुक्तिदो नृणाम् ॥ ५ ॥

अनन्तभोगपर्यङ्के श्रीभूमिभ्यां निषेवितः ।
इत्युक्तं तु त्वया पूर्वं ब्रह्माण्डाख्यानविस्तरे ॥ ६ ॥
पृच्छामोऽद्य हि तच्छ्रोतुं महत् कौतूहलं च नः ।
क्षीराब्धिशयनोऽनन्तः कुतोऽत्रागाद्विरभूद्धरिः ॥ ७ ॥
कस्य प्रसन्नो भगवान् कस्मादत्रागतः स्वयम् ।
एतदन्यच्च नो ब्रूहि विस्तराद् गोमहर्षण ॥ ८ ॥
इति पृष्टस्तदा सूतः स्मृत्वानन्तासनं हरिम् ।
पुलकाङ्कितसर्वाङ्गः सन्नांपाङ् गद्गदाक्षरः ॥ ९ ॥
प्राहेदं भक्तिभरितो वैभवं शेषशायिनः ।

श्रीसूत उवाच

शृण्वन्तु मुनयः सर्वे माहात्म्यं शार्ङ्गधन्वनः ॥ १० ॥
भोगिभोगशयोऽनन्तः सन्निधत्तेऽत्र युष्मतः ।
अनन्तशयनं नाम क्षेत्रं तन्मुक्तिदायकम् ॥ ११ ॥
तदेव नारसिंहाख्यं पुण्यक्षेत्रं श्रुते युगे ।
प्रागुदक्प्रवणं तस्मादादिकेशवसंज्ञितम् ॥ १२ ॥
क्षेत्रमाद्यं महापुण्यमाद्यनन्ताभिधं च तत् ।
एतत् क्षेत्रं महापुण्यं स्मरणान्मुक्तिदं नृणाम् ॥ १३ ॥

अनेकतीर्थसंयुक्तं जनस्थाने वसन् खरः ।
रणे रामेण निहतो मुनीनां त्राणकारणात् ॥ १४ ॥
साक्षाद् गङ्गैव यत्रास्ते भाल्लरूपेण केशवे ।
महेन्द्राद्रेश्च सप्तयादष्टयोजनदूरतः ॥ १५ ॥
रामक्षेत्रे महापुण्यं योजनत्रयमम्मितम् ।
अनन्तशयनक्षेत्रं सर्वपापहरं परम् ॥ १६ ॥
यत्रागत्य हरिः शेते शेषभोगेऽम्बुधस्तटे ।
आनर्ते द्वारकाख्यं तु पुरं श्रीकृष्णनिर्मिते ॥ १७ ॥
सर्वे निवासं तत्रैव चक्रुर्मुक्तास्तपोधनाः ।
पिण्डारकात् कुरुक्षेत्राच्छ्रीशैलाद् वङ्कटाचलात् ॥ १८ ॥
सालग्रामाच्च गङ्गाया गोदावर्याश्च यामुनात् ।
समागताः समभ्येत्य निवसन्ति महर्षयः ॥ १९ ॥
श्रीकृष्णसेवानिरताः सर्वक्षेत्रोत्तमोत्तमे ।
तेषां मध्ये महातेजा दिवाकरसमप्रभः ॥ २० ॥
यतिर्दिवाकराख्योऽभूत् सर्वकामेषु निःस्पृहः ।
विरक्तस्तौलवो योगी हरिं क्षीराब्धिशायिनम् ॥ २१ ॥
द्रष्टुमभ्यर्चयद् विष्णुं मुक्तिकामो जितेन्द्रियः ।
स एवमर्चितोनित्यं भक्त्या चोपशमेन च ॥ २२ ॥

सन्तुष्टो भगवान् विष्णुस्तस्य प्रादुरभूत् पुरः ।
सर्वलक्षणसम्पन्नः कोमलाङ्गोऽतिसुन्दरः ॥ २३ ॥
मधुरः कलभाषी च स्मितवक्त्रोऽम्बुजलोचनः ।
इन्दीवरश्यामलाङ्गः कुन्ददन्तः सुनासिकः ॥ २४ ॥
पद्मनतः पद्मरक्तो मधुराधरशोभितः ।
द्विर्दशबालसदृशो ददृशे पुरुषो यतेः ॥ २५ ॥
तं दृष्ट्वालौकिकं बालं लावण्यवरुणालयम् ।
सर्वसङ्गविरक्तोऽपि तत्संगतिसमुत्सुकः ॥ २६ ॥
आलिङ्गन्निव बाहुभ्यां चुम्बन्निव मुखाम्बुजम् ।
तं बालं सहसादाय स्वाङ्कमारोपयन्निव ॥ २७ ॥
तातेत एहीत्याहैनं का ते माता च कः पिता ।
कुतः समागतोऽसि त्वं वदैतन्मधुराक्षरम ॥ २८ ॥
तव वागमृतं पातुं बाल मे सत्वरं मनः ।
इत्युक्तः प्राह बालोऽपि दयया भावशोधकः ॥ २९ ॥
न जाने जननीं वापि जनकं वापि सुव्रत ।
त्वं मां लालय भद्रं ते लालनीयं सुतं यथा ॥ ३० ॥
बाला हि बहुमत्यैव तुष्यन्ति निवसन्ति च ।
अवमत्या हि कुप्यन्ति प्रद्रवन्ति ततः परम् ॥ ३१ ॥

वयं तु बहुमानार्हा नावमान्याः कदाचन ।
किं वा किं वा करोम्यत्र हठाद् बालोऽतिचञ्चलः ॥३२॥
साध्वसाध्वपि वा कृत्यं न स्याद् बहुमतिच्युतिः ।
न चैवावमतिः कार्या त्वया लालयता च माम् ॥३३॥
यदा मामवमन्ता त्वं तदान्यत्र व्रजे ध्रुवम् ।
न चावमानं क्षमते बालः कुत्रापि वेत्सि तत् ॥३४॥
तस्माल्लालय मां योगिन्नित्युक्त्वा विरराम सः ।
ततो दिवाकरयतिः श्रुत्वा तद् बालभाषितम् ॥३५॥
कलाक्षरं वागमृतं पिबन् श्रोत्रद्वयेन सः ।
निर्वृतिं परमां लेभे सुधातृप्त इवामरः ॥३६॥
तं लालयामास यतिर्मुदैव
तद्दर्शनस्पर्शनभाषणादिभिः ।
ध्यायन् सदा तं हृदयेऽर्चनेऽपि
काले च योगे च तमेव दध्यौ ॥३७॥

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये

प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

श्रीसूत उवाच—

पार्वत्याश्च महेशस्य समुद्वाहमहोत्सवम् ।
द्रष्टुं समागताः सर्वे लोका गौरीगुरुं गिरिम् ॥ १ ॥
ततो भारेण महता भूमिर्निम्नोन्नतासवत् ।
सुरान् शरणमापुस्ते लोकाः पालनयार्दिताः ॥ २ ॥
सुरास्ते चाविदित्वा तु लोकसन्त्राणकारणम् ।
त्वष्टारं पुरतो दृष्ट्वा तमूचुश्चिन्तयान्विताः ॥ ३ ॥
चित्रकर्ममहाप्राज्ञ नानाशिल्पविशारद ।
कथमत्र विधास्यामो लोकसन्त्राणमद्य वै ॥ ४ ॥
कथं पृथ्वी समा भूयान्निम्नोन्नतविवर्जिता ।
एतद्भारसमं वस्तु किमत्र स्याद् वदाधुना ॥ ५ ॥
त्वया नाविदितं किञ्चित् त्रिषु लोकेषु विद्यते ।
क्षिप्रं तद्ब्रूहि धर्मज्ञ लोकसन्त्राणकारणम् ॥ ६ ॥
इत्युक्तो विश्वकर्माह तुलाज्ञानी रहः सुरान् ।
आस्तेऽगस्त्यस्तपोराशिर्मुनीन्द्रः कुम्भसम्भवः ॥ ७ ॥
वातापिर्भक्षितो येन सर्वसज्जनघातुकः ।
येन पीतो महाम्भोधिर्लक्षयोजनविस्तृतः ॥ ८ ॥

अल्पाकृतिरपि श्रीमान् वेदभारसमन्वितः ।
तं दक्षिणाम्बुधेस्तीरे वस्तुं मलयपर्वते ॥ ९ ॥
नियोजयत सर्वेऽपि महादेवेन विष्णुना ।
ततः समभरा भूमिर्भवेल्लोकश्च निर्वृतः ॥ १० ॥
इत्युक्तास्ते सुरा विष्णुं भगवन्तं बभाषिरे ।
भगवन् कुम्भजो योगी वस्तुं मलयपर्वते ॥ ११ ॥
त्वया नियुज्यतां शीघ्रं लोकानां नान्यथा सुखम् ।
स तु ते शासनं स्वामिन् नोल्लङ्घयति ते प्रियः ॥ १२ ॥
इत्युक्तस्तैर्हरिः शम्भुर्मुनिमाहूय सादरम् ।
उवाच कुम्भजं विष्णुर्मलयं याहि भो द्रुतम् ॥ १३ ॥
सर्वलोकोपकाराय तद्धि मम तोषणम् ।
इत्युवाच हरिस्तं वै महादेवश्च तं मुनिम् ॥ १४ ॥
उवाच त्वं प्रयाहीति मलयं भूधरोत्तमम् ।
ततो भूः समभारा स्याल्लोकाः सर्वे च निर्भयाः ॥ १५ ॥
तदेव हि तपः श्रेष्ठं तदेव हरितोषणम् ।
तत्रैव युञ्जतो योगं ताम्रपर्ण्यास्तटे शुभे ॥ १६ ॥
अघमर्षणरूपोऽसौ हरिः प्रादुर्भवेच्च ते ।
त्रिकूटाद्रिर्महेन्द्राद्रिर्मलयश्च कुलाचलः ॥ १७ ॥

त्वसङ्गतास्तपस्यन्ति ताम्रपर्णीं सरिद्वरा ।
स्नास्यतां मुक्तिदानाय हरिसन्दर्शनेच्छया ॥ १८ ॥
तेषामभीष्टदानार्थं तव लोकोपकारिणः ।
प्रादुर्भवति पद्माक्षः पद्मनाभोऽम्बुधेस्तटे ॥ १९ ॥
ततो लोकोपकाराय व्रज त्वं मलयाचलम् ।
इत्युक्तः कुम्भजः खिन्नः प्राहेशं करुणानिधिम् ॥२०॥
अर्धनारीशरीरोऽपि गौरीमुद्वहसेऽद्भुतम् ।
सन्तन्वन् नयनानन्दं जनानां पश्यतां प्रभो ॥ २१ ॥
देवानामभयार्थाय गौरीमुद्वाह्य शोभसे ।
त्वां द्रष्टुं परमानन्दमन्दिरं सुन्दराकृतिम् ॥ २२ ॥
कल्याणसमयार्हाढ्यरूपभूषणराजितम् ।
गौर्या सह समासीनमासने लोकवन्दितम् ॥ २३ ॥
समागतोऽहं देवेश कृतार्थोऽस्मि ततः प्रभो ।
भक्ताभीष्टद मद्वाञ्छां न विहन्तुं त्वमर्हसि ॥ २४ ॥
नमो नमस्ते गौरीश करुणाकर शङ्कर ।
विडम्बयसि मां कस्मादल्पकं त्वत्परायणम् ॥ २५ ॥
महाभारसमत्वं मे कथं स्यात् तद् ब्रवीहि मे ।
इत्युक्तः प्रहसन्नाह महादेवस्तपोनिधिम् ॥ २६ ॥

जानेऽहं त्वां महाभाग वेदराशिं तपोनिधिम् ।
त्वष्टा च त्वां विजानाति तुलाशिल्पविचक्षणः ॥ २७ ॥
ततो गच्छ महाभाग मलयाद्रिमितो द्रुतम् ।
कल्याणवेषवेषाढ्यं मां तु त्वं तत्र पश्यसि ॥ २८ ॥
मा विलम्बस्व योगीन्द्र लोकस्यास्तु द्रुतं सुखम् ।
इत्युक्तः सूचकं ज्ञात्वा त्वष्टारमशपन्मुनिः ॥ २९ ॥
सर्वशिल्पाधिकोऽपि त्वं सूचनाद् गर्हितो भव ।
रिक्तो लोकैरमान्यश्च लोकेऽस्मिन् भव सान्वयः ॥ ३० ॥
इति शप्तस्तदा त्वष्टा शशापैनमपि द्विजम् ।
वृथा शपसि मां यस्मान्निरागसमपि द्विज ॥ ३१ ॥
याच्ञापरत्वं दारिद्र्यं त्वां च त्वत्कुलजानपि ।
सर्वदा संस्पृशेदेव त्वामन्वेतु त्वदीरितम् ॥ ३२ ॥
इति शप्त्वाभवत् तूष्णीं ज्ञात्वा भाव्यं च तन्मुनिः ।
ययौ सद्यः स विन्ध्याद्रिं सूर्यमार्गनिरोधकम् ॥ ३३ ॥
महोन्नतं वर्धमानं स्वपादानतमीक्ष्य सः ।
करेणालम्ब्य तं शैलं प्रीणयन् स गिरा मुनिः ॥३४॥
औन्नत्यं मुञ्च भद्रं ते समस्त्वं शोभसे भुवि ।
मदागमनपर्यन्तमेवं वर्तस्व भूधर ॥ ३५ ॥

इत्युक्त्वा स ययौ योगी मलयं पर्वतोत्तमम् ।
तत्रासीनः समभरां विधायाशु वसुन्धराम् ॥ ३६ ॥
तपस्तेपेऽत्र सुमहद् द्रष्टुं क्षीराब्धिशायिनम् ।
महेन्द्रेण त्रिकूटेन मलयाख्येन चाद्रिणा ॥ ३७ ॥
ताम्रपर्ण्या महानद्या सहैव विनयान्वितः ।
तेषां प्रसन्नो भगवानाविर्भावोन्मुखस्तदा ॥ ३८ ॥
बालरूपो हरिः श्रीमान् दिवाकरसुलालितः ।
बाल्योचितानि स्वैरेण प्रीतिदानि यतेः सदा ॥ ३९ ॥
नानाविधानि कर्माणि कुर्वन्नास्तेऽतिमानितः ।
कदाचित् तस्य पुरतो देवार्चासमये हरिः ॥ ४० ॥
सालग्रामं समादाय हस्तेनास्ये निरक्षिपत् ।
तद् दृष्ट्वा विह्वलो योगी वारयन् वामहस्ततः ॥ ४१ ॥
भर्त्सयामास चाक्रोशन् शोचन् निन्दन् स्मयन् हसन्
यदैवं वर्तते योगी तदा बालोऽवमानितः ॥ ४२ ॥
दिवाकरमुवाचेदं मोहयन् भगवान् हरिः ।
ऋषिश्रेष्ठ यतस्त्वं मामवमंस्थाः सुकोपितः ॥ ४३ ॥
इतःपरं मया तस्मान्नोषितव्यमिहाश्रमे ।
द्रष्टा च परतो मां त्वमनन्ताख्ये महावने ॥ ४४ ॥

इत्युक्त्वा भीतवत् तस्मादपाक्रामत् पराङ्मुखः ।
दिवाकरयतिर्दृष्ट्वा बालं तमवमानितम् ॥ ४५ ॥
पश्चात्तप्तस्तद्विरहमसहन् पृष्ठतोऽन्वगात् ।
देवार्चनादिकं सर्वं परित्यज्यातिकातरः ॥ ४६ ॥
तात मा याहि मा याहि मामीक्षस्वैकदार्भक ।
यदि गच्छसि मां त्यक्त्वा न तिष्ठन्ति ममासवः ॥४७॥
त्वं मे प्राणा धनं च त्वं तपो मे त्वं हि देवता ।
सर्वस्वं मे भवांस्तात कथं त्वद्विरहं सहे ॥ ४८ ॥
सालग्रामान् यथेष्टं त्वमन्यान् गृह्णीष्व मत्पुरः ।
दास्याम्यहं तव प्रीत्या वितरास्ये क्षिपाथवा ॥ ४९ ॥
मामालोकय पश्चात ते व्रजन्तं शोकविह्वलम् ।
आप्याययय सुधाधारामधुरैः कलभाषणैः ॥ ५० ॥
तिष्ठ तिष्ठ क्षणं बाल मा याह्यायाहि मां भवान् ।
अहं वा त्वां समेष्यामि सुजातौ ते पदौ भृशम् ॥५१॥
रक्तौ पुनश्चातिरक्तौ दृष्ट्वाहं कथं सहे ।
शनैर्वा सुकुमाराङ्ग गच्छ मा धावताद् भवान् ॥५२॥
इत्यर्थयन् स तं बालं द्रुतमन्वगमद्धरिम् ।
हस्तप्राप्तमिवेशं तं मन्यते यतिपुङ्गवः ॥५३॥

ग्रहीतुमिच्छति स तं मुनिचित्ताद्यगोचरम ।
एवं यत्यनुयातोऽसौ देवो दूरपथं गतः ॥ ५४ ॥
प्रविशन् खेटपल्ल्यादिश्रेणीग्रामव्रजाकरान् ।
वनानि चाप्यतिक्रम्य तूर्णं वेलावनं गतः ॥ ५५ ॥
योजनत्रयमात्रेण दक्षिणाम्बुनिधेस्तटे ।
वृक्षमेकं सुसंवृद्धं योजनत्रयमुच्छ्रितम् ॥ ५६ ॥
दृष्ट्वा महान्तं बालोऽसौ देवदेवः कृपानिधिः ।
अनुग्रहीतुं लोकांश्चाप्यगस्त्यमलयादिमान् ॥ ५७ ॥
अनुगृह्णन् यतीन्द्रं तमनुरक्तं दिवाकरम् ।
प्राविशत् तस्य वृक्षस्य कोटरं पश्यतो मुनेः ॥ ५८ ॥
ततः ससम्भ्रमो वेगादनुयातो यतिस्तदा ।
स वृक्षोऽप्यपतद् वेगात् तद्भारमसहन् द्रुतम् ॥ ५९
योजनत्रयमाक्रम्य निवाते विस्मयप्रदः ।

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये
द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः

ततो दिवाकरो योगी बालान्वेषणतत्परः ।
तूर्णमभ्यागतो भूमौ पतितं भूरुहं तदा ॥ १ ॥
अपश्यमानस्तं तत्र बालकं व्याकुलो भृशम् ।
कोटरेऽप्यनुसंविश्य तमपश्यन् भयातुरः ॥ २ ॥
आसमुद्रमुपाधावद् यावत् स पतितस्तरुः ।
तत्रापि तमपश्यन् वै शोकमोहार्दितो यतिः ॥ ३ ॥
ध्यायन्नेव स तं बालं सुकुमारं कुमारकम् ।
वेपमानोऽश्रुपूर्णाक्षो विललाप स चिन्तयन् ॥ ४ ॥
प्रिय बाल कुतोऽसि त्वं सुकुमाराङ्ग सुन्दर ।
भवानेव मम प्रेष्ठस्त्वदायत्तं हि जीवितम् ॥ ५ ॥
त्वामदृष्ट्वा न जीवामि क्षणमप्यत्र पुत्रक ।
कुत्र लीनोऽसि मां पश्य त्वय्येव सततं रतम् ॥ ६ ॥
नाहं त्वत्सदृशं बालं पश्यामि न शृणोमि च ।
बालाकृतिस्त्वं कृष्णोऽजः किमनन्तशयो हरिः ॥ ७ ॥
नूनं स भगवानेव मदनुग्रहतत्परः ।
प्रादुरासीन्मत्पुरतो मन्नेत्रानन्ददो विधुः ॥ ८ ॥

न कस्यापीदृशं रूपं लोकेऽस्मिन् बालकस्य हि ।
स्वयमेव प्रसन्नस्त्वं कुतश्चान्तर्दधे भवान् ॥ ९ ॥
त्वामदृष्ट्वा न जीवामि त्वच्चित्तस्त्वत्परायणः ।
आगच्छ कोटरमुखाद् वृक्षं निर्भिद्य वा भवान् ॥ १० ॥
न जाने त्वामत्र बालं वृक्षेऽस्मिन् क्व तिष्ठसि ।
भूरुहो भूरिपुण्याढ्यो नूनं त्वद्वासगोचरः ॥ ११ ॥
पापिनामहमेवाग्र्यो यन्मां त्यक्त्वाविशन्तरुम् ।
यद्यहं तरुजन्मा स्यां व्रजाम्यद्य कृतार्थताम् ॥ १२ ॥
भवदर्शनमात्रेण मुक्त्येवानन्दनिर्भरः ।
नूनं त्वद्रूप एवायं वृक्षराजो महोन्नतः ॥ १३ ॥
एकीभूतो यतोऽत्र त्वं शेषे श्रान्त इवाध्वनि ।
नूनं त्वमेव भगवाननुगृह्णीष्व मां विभो ॥ १४ ॥
दर्शयस्व महाबाहो त्वदीयं रूपमद्भुतम् ।
याद त्वां नेह पश्यामि प्राणा गच्छन्त इह क्षणात् ॥
इत्युक्त्वा स यतिर्मौनी मीलिताक्षोऽश्रुलोचनः ।
दध्यौ तमेव मनसा हरिं क्षीराब्धिशायिनम् ॥ १६ ॥
ततः प्रादुरभूद् देवस्तरुरेव हरिः स्वयम् ।
त्रियोजनोच्छ्रिताकारः शयानः शङ्खचक्रधृत् ॥ १७ ॥

वेलावने मत्स्यतीर्थे सकिरीटं शिरोऽस्य हि !
चक्रतीर्थे शङ्खतीर्थे स्थितौ बाहू हरेस्तदा ॥ १८ ॥
वाराहे पद्मतीर्थे च पादतीर्थेऽस्य पश्चिमे ।
उदरं मध्यतो नाभिपङ्कजं चोरुयुग्मकम् ॥ १९ ॥
वामदक्षिणपादौ द्वावधर्मे धर्म एव च ।
एवं विस्तृतदेहोऽसौ वृक्ष एवाकृतिर्हरेः ॥ २० ॥
अनन्तशयनस्यास्य पद्मनाभस्य शार्ङ्गिणः ।
तेजोरूपं दारुमयं यतेः प्रादुरभूत् पुरः ॥ २१ ॥
दृष्ट्वा तेजोमयं दिव्यं हरेः रूपं महाद्भुतम् ।
उन्मील्य लोचनेऽपश्यत पद्मनाभं दयानिधिम् ॥ २२ ॥
सहस्रादित्यसङ्काशं पद्मपत्रारुणेक्षणम् ।
शयानं भोगिपर्यङ्के श्रीवत्साङ्कं चतुर्भुजम् ॥ २३ ॥
मलयश्च महेन्द्राद्रिस्त्रिकूटः पर्वतोत्तमः ।
अगस्त्यस्ताम्रपर्णी च सर्वे तं ददृशुस्तदा ॥ २४ ॥
वरदं सुस्मितं शान्तं सर्वावयवसुन्दरम् ।
रक्तपादतलं श्रीमद्रक्तोत्पलमृदूज्ज्वलम् ॥ २५ ॥
ध्वजवज्राङ्कुशाम्भोजरेखालक्ष्मसुलक्षितम् ।
भवाब्धिपोतं योगीन्द्रहृदम्बुजसुवासिनम् ॥ २६ ॥

रमाकोमलहस्ताब्जलालितं पद्मजार्चितम् ।
लसन्नखमणिश्रेणिभासिताङ्गुलिराजितम् ॥ २७ ॥
सुगूढगुल्फप्रपदं शिञ्जन्मञ्जीररञ्जितम् ।
क्रमवृत्तातिललितजङ्घातूणीरशोभितम् ॥ २८ ॥
सुजानुचक्रसंशोभिहस्तिहस्तोरुरञ्जितम् ।
कनत्कनकसंराजद्घनपीताम्बरावृतम् ॥ २९ ॥
किङ्किणीगणसन्नद्धकाञ्चीदामविराजितम् ।
नाभीसरोऽतिगम्भीरं लोकपद्माकरं शुभम् ॥ ३० ॥
यत्र जातश्चतुर्वक्त्रस्तत्रस्थस्तं निषेवते ।
नारदस्तुम्बुरुः सिद्धा गन्धर्वा लोकपालकाः ॥ ३१ ॥
देवास्तमभितः सन्ति तत्सेवालसितान्तराः ।
उदरं चाखिलजगत्संश्रयं परमेशितुः ॥ ३२ ॥
त्रिवलीशोभितं पीनं दर्शनीयं च सुन्दरम् ।
लक्ष्मीनिवासहृदयं श्रीवत्सशुभलक्षणम् ॥ ३३ ॥
वलयाङ्गदसंवीतमुत्तुङ्गभुजशोभितम् ।
अहोरात्रात्मपार्श्वं तं चतुर्बाहुविराजितम् ॥ ३४ ॥
शङ्खचक्राङ्कितं बाहुमेकं कृत्वोपबर्हणम् ।
प्रसार्य जानुपर्यन्तमेकहस्तं सुकोमलम् ॥ ३५ ॥

कम्बुकण्ठं राजयन्तं मणिराजं च कौस्तुभम् ।
बिम्बाधरप्रभारक्तकुन्ददन्तौघविद्रुमम् ॥ ३६ ॥

कपोलदर्पणोद्भासि सुनासमतिसुन्दरम् ।
मन्दहासानन्दितहृन्मन्दिरं सुन्दरं सताम् ॥ ३७ ॥

प्रोत्फुल्लपुण्डरीकाक्षवीक्षिताजासनाननम् ।
करुणापूरितापाङ्गं सुललाटविराजितम् ॥ ३८ ॥

कुन्तलभ्रमरावीतसुगन्धिमुखपङ्कजम् ।
नानामणिगणोद्भासिसुकिरीटविराजितम् ॥ ३९ ॥

गुणार्णवं कोमलाङ्गं तरुणं सुन्दराकृतिम् ।
भोगिभोगे शयानं तं लोचनानन्ददायिनम् ॥ ४० ॥

सर्वे ते ददृशुर्देवं पद्मनाभं पुरातनम् ।
अनन्ताख्यं परं ब्रह्म सच्चिदानन्दविग्रहम् ॥ ४१ ॥

ब्रह्मेशानादिभिर्देवैर्वन्दिताङ्घ्रिसरोरुहम् ।
दृष्ट्वा दिवाकरो योगी पद्मनाभं पुरातनम् ॥ ४२ ॥

सदाभिलषितं श्रीशं श्रीवत्साङ्कं कृपानिधिम् ।
सम्भ्रमाविष्टहृदयो दण्डवत् पतितो भुवि ॥ ४३ ॥

पुलकाङ्कितसर्वाङ्गः पूर्णानन्दजलेक्षणः ।
वेपमानो भक्तिपूर्णः सत्त्वमास्थाय साध्वसम् ॥ ७ ॥
तुष्टावानन्तदेवेशं पद्मनाभं दयानिधिम् ।

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये

तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः

दिवाकर उवाच—

ॐ नमो वासुदेवाय पद्मनाभाय विष्णवे ।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ॥ १ ॥
सनकादिसहायोगिमनोगम्याय ते नमः ।
ब्रह्मा त्वां न विजानाति सर्ववेदैः स्तुवन् सदा ॥ २ ॥
यस्य देवाश्च दैत्याश्च त्वां न विन्दन्ति भो विभो ।
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥ ३ ॥
अनन्तं पद्मनाभेश कथं त्वां स्तौमि बालिशः ।
सर्वेज्ञः सर्वकर्ता त्वं स्रष्टा पाता च नाशकृत् ॥ ४ ॥

जगतोऽस्य जगन्नाथ जगदन्तस्थितो भवान् । [यान् ॥
अस्मस्यपारे भुवनस्य मध्ये नाहस्य पृष्ठे महो नदी-
तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परं कवीनाम् ।
यच्च किञ्चिज्जगत्यास्मन् दृश्यते श्रूयतेऽपि वा ॥ ६ ॥
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः ।
स्थिरचरात्मकाच्चैव न ब्रह्मोऽन्तेऽभिधीयते ॥ ७ ॥
अशेषनाम भगवन् त्वमेको ब्रह्मणः सदा ।
वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः ॥८॥
दिवि वाऽन्तरिक्षेऽग्नाकारोऽग्नौ वा पृथिव्यां च ।
वनस्पतिषु चन्द्रे च नानालक्षणमण्डले ॥ ९ ॥
तथा सर्वेषु भूतेषु वसन्तं तत्तल्लक्षणम् ।
सर्वान्तर्यामिणं देवं को विजानाति सादृशः ॥ १० ॥
चेतोगम्योऽसि देवेश प्रत्यक्षानुमानतः ।
सर्वनामासि भगवन् क्षराक्षरवरः पुमान् ॥ ११ ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सर्वं व्याप्यातिरच्य त्वं वसस परमाद्भुतः ॥ १२ ॥
भूतं भव्यं भविष्यच्च जगत् त्वद्वशगं सदा ।
मुक्तिस्त्वं हि सर्वेषां ब्रह्मादीनां परा गतिः ॥ १३ ॥

एतावानेव महिमा तव ज्यायांस्ततोऽपि वा ।
भूमन् मान्याप्रमेयात्मन् को हि वर्णयितुं क्षमः ॥ १४ ॥
त्रिषाड्सि चतुष्पाच्च दिवि भूमौ सुरार्चित ।
विश्वं व्यतिक्रमस्त्वं हि साशना नशने अभि ॥ १५ ॥
त्वन्नाभिपङ्कजाज्जातो विराड् ब्रह्मा प्रजापतिः ।
सर्वजीवाश्रयो नाथः सर्वेषां च पितामहः ॥ १६ ॥
सर्वातिरिक्तो लोकानां स्रष्टा वृत्तिप्रदो महान् ।
सप्त सप्त च लोकान् स सृष्टवांस्त्वदनुग्रहात् ॥ १७ ॥
त्वां त्वत्प्रीत्यै यजन् ब्रह्मा वेदोक्तेनैव वर्त्मना ।
त्वदङ्गजातै राज्याद्यैर्हविर्भिश्चेध्मपूर्वकैः ॥ १८ ॥
यज्ञं त्वामयजद् देवं पुरुषं पुरुषोत्तमम् ।
तेन सृष्टास्ततो देवाः साध्याश्च ऋषयश्च ये ॥ १९ ॥
त्वां यजन्ति सदा तृप्तं यज्ञभोक्तारमव्ययम् ।
तस्माद् यज्ञाच्च पशवो ग्राम्यारण्याश्च जज्ञिरे ॥ २० ॥
त्वत्तो यज्ञात् तदाभूवन् ऋग्यजुःसामपूर्वगाः ।
अनुष्टुबादिच्छन्दांसि द्विशफाश्चैकतःशफाः ॥ २१ ॥
अश्वगोऽजाविकाद्याश्चाप्येकतोभयतोदतः ।
यज्ञस्य पुरुषस्यास्य मुखाद्वै ब्राह्मणोऽजनि ॥ २२ ॥

बाह्वोरजनि राजन्य ऊर्वोर्वैश्योऽभवत् तदा ।
बोधनावनवार्तार्थं पद्भ्यां शूद्रो व्यजायत ॥ २३ ॥
शुश्रूषार्थं त्रिवर्णानां मनसोऽस्य हि चन्द्रमाः ।
सूर्यो वै चक्षुषो जातः प्रकाशानन्ददो भुवि ॥ २४ ॥
इन्द्राग्नी चास्य मुखतो लोकत्राणपरायणौ ।
यस्य प्राणादभूद् वायुः सर्वचेष्टाप्रदः सदा ॥ २५ ॥
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकानकल्पयत् ॥२६॥
यज्ञसृष्टेन हविषा यज्ञं त्वामयजन् सुराः ।
तान्येवासंश्च धर्माणि प्रथमानि नृणामिह ॥ २७ ॥
इष्ट्वा यज्ञं ततो मुक्तिमापुस्ते यत्र सन्ति हि ।
पूर्वमुक्तास्तथा देवाः साध्याः संसाधका हरेः ॥ २८ ॥
श्रीश्च भूमिश्च पत्न्यौ ते विष्णोरते परमं पदम् ।
सूरयः परिपश्यन्ति ब्रह्माद्यास्त्वत्कृपावशात् ॥ २९ ॥
भीषास्माद् वातः पवते भीषोदेति सूर्यः ।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥ ३० ॥
न जाने महिमानं ते त्वामहं स्तोमि वा कथम् ।
त्वद्दर्शनात् कृतार्थोऽस्मि मामव प्रभवाप्ययात् ॥३१॥

त्वत्पादसेवानिरतं सदा मां कुरु माधव ।
मा मां शोधय विश्वात्मन् संसारभयविह्वलम् ॥ ३२ ॥
इति स्तुत्वा यतिस्तूष्णीमास्ते भक्तजनप्रियः ।

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये

चतुर्थोऽध्यायः ।

अथ पञ्चमोऽध्यायः

श्रीसूत उवाच
तत्रागस्त्यो महायोगी सर्ववेदविदां वरः ।
दृष्ट्वानन्तं पद्मनाभं शयानमपराजितम् ॥ १ ॥
अपरोक्षीकृतं सद्यः स्वतपःफलरूपिणम् ।
कृतकृत्यो मुदापूर्णमानसः पुलकाङ्कितः ॥ २ ॥
नत्वा नत्वा पुनर्देवं तुष्टावानन्तशायिनम् ।
अगस्त्य उवाच—
ॐ नमो भगवते वासुदेवाय परमात्मने ॥ ३ ॥
क्षीराब्धिशयनानन्त पद्मनाभ नमोऽस्तु ते ।
रजांसि गणयेद् भूमेर्यः को वापि पुमान् भुवि ॥ ४ ॥

न ते गुणांश्च वीर्याणि कर्माणि गणयेन्नरः ।
एकं ब्रह्माद्वितीयं त्वं समाधिकविवर्जितः ॥ ५ ॥
नह नाना भिदा वास्ति गुणरूपादिभेदतः क्वचित् ।
सत्यं ज्ञानमनन्तं ब्रह्म त्वं सम्पूर्णगुणत्वतः ॥ ६ ॥
त्वमेव सर्वं देवेश सर्वज्ञोऽपि वै यतः ।
ब्रह्मादिजीवसङ्घानां चेष्टकोऽपि दृशिदः सदा ॥ ७ ॥
मुक्तिदः सात्त्विकानां त्वं राजसानां च बन्धकृत् ।
तामिस्रादिप्रदस्त्वं हि तामसानां नृणां ध्रुवम् ॥ ८ ॥
सर्वदा सत्यकामस्त्वं सत्यसङ्कल्प एव च ।
ब्रह्म त्वां ये विदन्तीश ब्राह्मिष्ठे पदे हि ते ॥ ९ ॥
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ।
हृद्धानिदं वेद यो विष्णुं सर्वत्रैक्यम् ॥ १० ॥
स वै ज्ञानात्मना तेन विष्णुना सुखमश्नुते ॥

अङ्गुष्ठमात्रः पश्यत रूपमस्य
कलारूपीशं पुरुषं ब्रह्मयोनिम्
तदा विद्वान् पुण्यपाप विधूय
निरञ्जनः परमं साम्यमुपैति ॥ ११ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ १२

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।
त्वद्दर्शनमभूद् देव दुर्लभं सर्वदेहिनाम् ॥ १३ ॥
न काङ्क्षेऽन्यदितो देव पद्मनाभ नमोऽस्तु ते ।
नमस्ते सुकुमाराय गुरवे ब्रह्मणस्तथा ॥ १४ ॥
धर्मजाताय कृष्णाय नमो नारायणाय ते ।
हरये कपिलायापि दत्तात्रेयाय योगिने ॥ १५ ॥
नमोऽस्तु जामदग्न्याय वेदव्यासाय ते नमः ।
नमो मत्स्याय कूर्माय स्त्रीरूपाय नमो नमः ॥ १६ ॥
नमोऽस्तु धन्वन्तरये देवतामृतदायिने ।
धेनवे वसवे तुभ्यं हंसाय गुरवे सताम् ॥ १७ ॥
नमः शुचिषदे तुभ्यं पृश्निगर्भाय ते नमः ।
नमो दारुकरूपाय यज्ञाय विभवे नमः ॥ १८ ॥
सत्यसेनाय हरये तापसायेभरक्षिणे ।
वैकुण्ठायाजितायापि वामनाय नमो नमः ॥ १९ ॥
सार्वभौम नमस्तुभ्यं वृषभाय नमो नमः ।
विष्वक्सेनाय ते धर्मसेतवे च नमोऽस्तु ते ॥ २० ॥
सुधाम्ने बार्हतायापि बृहद्भानो नमोऽस्तु ते ।
नमो विश्वादिरूपाय नमस्ते बडबामुख ॥ २१ ॥

सर्ववर्णाभिधेयस्त्वं सर्ववेदोदितो भवान् ।
स्त्रीरूपश्चैव पुंरूपो बृहतीच्छन्दसेडितः ॥ २२ ॥
देशकालगुणैर्व्यासः परिच्छेद्यो न वै भवान् ।
अव्यक्तश्चाप्रमेयस्त्वं गुणपूर्णश्च निर्गुणः ॥ २३ ॥
अकर्ता सर्वकर्ता त्वमजो जातोऽसि चाच्युत ।
यस्य प्रसीदसि यदा यं वृणीषे स मुक्तिभाक् ॥ २४ ॥
वेदवेद्य रमाकान्त पद्मनाभ दयानिधे ।
प्रादुर्भूतोऽसि भगवन् करुणावरुणालय ॥ २५ ॥
न प्रार्थनीयं किञ्चिन्मे कृतार्थोऽहमतः परम् ।
न पारयेऽहं स्तोतुं त्वां वेदानधिगतं हरिम् ॥ २६ ॥
अनन्तपद्मनाभेश त्वद्भक्तिः शाश्वती मम ।
भवेन्मुकुन्द गोविन्द जिह्वा त्वन्नामगोचरः ॥ २७ ॥
त्वत्कथायां श्रुतिः सद्भिः सङ्गो मे सर्वदा भवेत् ।
अलमेतावता स्वामिन् पद्मनाभ प्रसीद मे ॥ २८ ॥
इत्युक्त्वानन्दबाष्पौघसंरुद्धनयनाम्बुजः ।
ससम्भ्रमो गद्गदवाक् तूष्णीमास्ते स्म कुम्भजः ॥२९॥

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये

पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः ।

श्रीसूत उवाच—

अथ देवं दयासिन्धुं प्रादुर्भूतं पुरो हरिम् ।
कुलाचलेन्द्रो मलयस्तुष्टाव मधुसूदनम् ॥ १ ॥

मलय उवाच—

नमोऽस्तु पद्मनाभाय सात्त्वताम्पतये नमः ।
सृष्ट्वा चराचरं विश्वं तद्गतो दारुवह्निवत् ॥ २ ॥

चराचरात्मा भगवन् परितस्त्वं परा गतिः ।
अश्वत्थस्त्वं हि वृक्षाणामद्रीणां काञ्चनाचलः ॥ ३ ॥

सन्ति हि त्वयि सर्वाणि त्वं च सर्वत्र वर्तसे ।
जगज्जडात्मकं देव त्वां विना चेष्टते कथम् ॥ ४॥

ब्रह्माण्डं च त्वदन्तस्थमभिवृद्धं कथं भवेत् ।
त्वमेव देहिनां देहे चेष्टकः परिणामकृत् ॥ ५ ॥

स्मृतिश्चैवावृतिर्ज्ञानं त्वत्तो जीवगणस्य हि ।
जडानां चेतनानां च भिन्नानां च पृथक् पृथक् ॥ ६ ॥

चेष्टको वृत्तिदश्चापि क्षराक्षरपरो भवान् ।
कथं त्वां स्तौमि देवेश स्थावरोऽहं जडाकृतिः ॥ ७ ॥

पश्यामि त्वां पद्मनाभ दयया ते दयानिधे ।
स्थावरेषु च ते दृष्टिर्बन्धमोक्षप्रदा सदा ॥ ८ ॥

अनन्ताद्य कृतार्थोऽस्मि दययेक्षस्व मां प्रभो ।
इत्युक्त्वा मलयस्तूष्णीमास्तेऽनन्तस्य सन्निधौ ॥ ९ ॥

महेन्द्राद्रिस्तथास्तौषीद् भोगिभोगशयं हरिम् ।

महेन्द्र उवाच --

नमोऽनन्ताय देवाय नागाधिपतये नमः ॥ १० ॥

सर्वलोकाधिपतये सर्वशब्दोदिताय च ।
सर्वक्षेत्रनिवासाय श्रीनिवासाय विष्णवे ॥ ११ ॥

नृसिंहायाप्रमेयाय वेदाद्रिनिलयाय च ।
वामनाय च रामाय जामदग्न्याय ते नमः ॥ १२ ॥

चित्रकूटविहाराय रामचन्द्राय ते नमः ।
हिमाद्रिकृतवासाय वेदव्यासाय ते नमः ॥ १३ ॥

नमस्ते शिपिविष्टाय चलायाप्यचलाय च ।
सालग्रामादिरूपाय कोलाचलविहारिणे ॥ १४ ॥

अहोबिलाचलपते सर्वेश्वर महाबल ।
समुद्रशयनानन्त घटिकाद्रिकृतालय ॥ १५ ॥

सर्वेश पद्मनाभाद्य स्तौतुं त्वां शक्नुयां कथम् ।
न वेदविन्न च ज्ञानी जडप्रायोऽस्म्यचेतनः ॥ १६ ॥

प्रादुर्भूतो भवानद्य जडेष्वपि च ते दया ।
कृतार्थोऽहमितोऽनन्तेत्युक्त्वा तूष्णीमभूद् गिरिः ॥१७

त्रिकूटश्चापि तुष्टाव प्रादुर्भूतं मुदा हरिम् ।

त्रिकूट उवाच—

नमोऽनन्ताय देवाय त्रिगुणातीतमूर्तये ॥ १८ ॥

श्रीभूदुर्गाधिपतये त्रिपदाय चतुष्पदे ।
त्रिगुणाय त्रिपृष्ठाय निस्त्रैगुण्यात्मने नमः ॥ १९ ॥

नमस्त्रियुगभूताय त्रयीमूर्ते नमोऽस्तु ते ।
नमस्त्रिपथगाजन्मस्थानपादसरोरुह ॥ २० ॥

नमस्त्रिलोकपतये त्रिधाम्ने च नमो नमः ।
त्रिविधानां च जीवानां नमस्त्रिगतिदायिने ॥ २१ ॥

नमस्ते त्रिगुणस्रष्ट्रे त्रिसन्ध्याकालसेवित ।
नामत्रयोच्चारणतस्त्रिविधाघौघहारिणे ॥ २२ ॥

अनन्तपद्मनाभाय नमस्तुभ्यं जनार्दन ।
त्वां स्तुवन्तः सदा वेदैर्ब्रह्माद्याः सर्वदेवताः ॥ २३ ॥
न पारयन्ति सर्वेश स्तुवे त्वां कथमल्पकः ।
प्रसीद भगवन् विष्णो त्राहि मामुद्धराच्युत ॥ २४ ॥
इत्युक्त्वा स त्रिकूटाद्रिस्तूष्णीमास्ते ससम्भ्रमः ।
अथास्तुवत् ताम्रपर्णी नदी देवोत्तमं हरिम् ॥ २५ ॥
भक्त्या परवशाङ्गी सा मयूरीवाम्बुदं कलम् ।

ताम्रपण्युवाच—

नमोऽस्त्वनन्ताय महाविभूतये
श्रीमन्नृसिंहास्तु नमः पुनस्ते ।
नमोऽस्तु मत्स्याकृतये महात्मने
नमोऽस्त्वकूपारगकूर्मरूपिणे ॥ २६ ॥
नमो वराहाय समुद्रचारिणे
नमोऽस्तु ते क्षीरसमुद्रशायिने ।
आपस्त्वमेव द्रवरूपकस्त्वं
त्वमेव चाद्यो भुवमुज्जहर्थ ॥ २७ ॥
त्वमेव चादावसृजो ह्यपो वै
तास्वेव शेषे पुरुषोत्तमस्त्वम् ।

नारायणोऽपां द्रवणे रसस्त्वं
त्वं जीवनं जीवनिकायधामन् ॥ २८ ॥
यतोऽप्सु वीर्यं व्यसृजः पुरा त्वं
तद्धैममण्डं तदभूत् ततो विधिः ।
संवत्सराख्यः ससृजे स सर्वं
ततो हि ते पूरुष वीर्यमापः ॥ २९ ॥
कथं महापूरुषमद्भुतं त्वां
स्तौम्यम्मयी च प्रमदातिमुग्धा ।
रमापते लालय मां मुकुन्द
भक्तां परां त्वद्गतसर्वभावाम् ॥ ३० ॥
विलोकय त्वं करुणाकटाक्षै-
र्भक्तेषु च स्नेहयुतैर्दयार्द्रैः ।
इति स्तुत्वा सुमधुरं ताम्रपर्णी महानदी !
तूष्णीमास्ते प्रेमभारसमाक्रान्तान्तरा तदा ॥ ३१ ॥

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये

षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः ।

अथ प्रसन्नो भगवांस्तानाह करुणाकरः ।
तपसा ते प्रसन्नोऽहं स्तोत्रेणापि च कुम्भज ॥ १ ॥
सर्वलोकोपकर्ता त्वं विन्ध्यसंस्थापको महान् ।
विप्रघ्नश्चापि वातापिर्जीर्णितो हि त्वया मुने ॥ २ ॥
पीतोज्झितो महानब्धिर्लक्षयोजनविस्तृतः ।
पूर्ववत् स्थापिता लोकाः पतमाना महाम्बुधौ ॥ ३ ॥
स्वे स्वे कर्मणि तिष्ठन्ति मदाज्ञामनुवर्तिनः ।
मया नियोजितस्त्वं हि वसस्यस्मिन् कुलाचले ॥ ४ ॥
मदाराधनमेतद्धि यत् प्राणिपरितोषणम् ।
वसात्र लोकरक्षार्थमाकल्पान्तं गिराम्पते ॥ ५ ॥
तवाभिमुख एवात्र शयानो निवसाम्यहम् ।
ततो मुक्तिं प्रदास्यामि कल्पान्ते तव कुम्भज ॥ ६ ॥
इत्युक्त्वा तं मुनिं विष्णुर्मलयं च कुलाचलम् ।
मेघगम्भीरया वाचा प्राह प्रहसिताननः ॥ ७ ॥
शृणु पर्वतराज त्वं कृतार्थोऽस्ति पुनर्भवान् ।
यतो मद्भक्तवर्येण सङ्गतो मुनिनामुना ॥ ८ ॥

मुक्तिद्वारं सतां सङ्गो दुर्लभः प्राणिनामिह ।
तदाश्चयस्तद्वासाय वस त्वं मुक्त एव हि ॥ ९ ॥
सद्भिस्तु सङ्गतिः क्वापि नावसीदति कर्हिचित् ।
तवाभिमुख एवाहं मोचये त्वां सहामुना ॥ १० ॥
इत्युक्त्वा तं महेन्द्राद्रिं प्राह देवो दयानिधिः ।
महेन्द्राद्रे प्रसन्नोऽहं तवास्मि सततं भुवि ॥ ११ ॥
अत्रावस त्वं मुक्तोऽसि ममाग्रैव हि सन्निधौ ।
हनूमान् देवकार्यार्थं वानरैरङ्गदादिभिः ॥ १२ ॥
सहागत्य त्वयि स्थित्वा समुद्रं लङ्घयिष्यति ।
कृतकार्यस्ततो वेगात् पुनस्त्वामाप्य निर्वृतः ॥ १३ ॥
हरिभिः सह सङ्गत्य भविता रामतोषकः ।
तत्सङ्गतो भवांश्चैव कृतार्थो भविता ध्रुवम् ॥ १४ ॥
अहं च भार्गवो भूत्वा दुष्टक्षत्रं प्रणाशयन् ।
कश्यपाय महीं दत्वा त्वामाश्रित्य वसे त्वयि ॥ १५ ॥
आकल्पान्तं ततो धन्यस्त्वं ततो मुक्तिमेष्यसि ।
तवाभिमुख एवाहं वसाम्यत्राम्बुधेस्तटे ॥ १६ ॥
इत्युक्त्वा तं त्रिकूटाद्रिमुवाच मधुसूदनः ।
त्रिकूटाचलवर्येदं शृणुष्व वचनं मम ॥ १७ ॥

त्वामावृत्य प्रवहति पुण्यगङ्गा पयस्विनी ।
इन्द्रद्युम्नोऽगस्त्यशापान्मुच्यते त्वदुपासनात् ॥ १८ ॥
तावत् सोऽहं तदाद्रीश त्वामायास्ये हरिः स्वयम् ।
ब्रह्मादयः समागत्य स्तुवन्ति त्वयि मां परम् ॥ १९ ॥
अनेन चापि रूपेण शयानस्त्वन्मुखो गिरे ।
कल्पान्ते मुक्तिदोऽहं ते नान्यथा मम भाषितम् ॥२०॥
इत्युक्त्वा तं गिरिं देवस्ताम्रपर्णीमभाषत ।
ताम्रपर्णि महादेवि मलयाचलसम्भवे ॥ २१ ॥
मूले रत्नाकरा त्वं हि मध्ये ताम्रौघजन्मभूः ।
मुक्ताकरान्तेऽब्धिसङ्गे स्नातृणामघहारिणी ॥ २२ ॥
अगस्त्यकुण्डिकाजाते ताम्रपर्णि शुचिव्रते ।
पदे पदे तीर्थमयी स्नातृणामघनाशिनी ॥ २३ ॥
नृसिंहः पद्मनाभोऽहमघमर्षणदेवता ।
स्नानकाले त्वयि ध्यातस्तारयेऽहं भवार्णवात् ॥ २४ ॥
गङ्गैव त्वं दाक्षिणात्या सप्तयोजनचारिणी ।
आसप्तयोजनं चाहं त्वत्तीरे बहुधा वसे ॥ २५ ॥
त्रिकूटस्थो गजार्तिघ्नो महेन्द्रे भार्गवो महान् ।
कुरङ्गे चैव पञ्चात्मा तोदाद्रीशो वृषाकपिः ॥ २६ ॥

आदिमूलस्तथां कृष्णो गोविन्दो विजयासनः ।
वैकुण्ठेशो भूमिपालो देवेशः पङ्कजेक्षणः ॥ २७ ॥
चोरनाट्यश्च निक्षेपवित्तश्च मकरादिकः ।
कर्णपाशाख्यनाथश्च त्वत्तीरे निवसाम्यहम् ॥ २८ ॥
ब्रह्मरुद्रमहेन्द्राद्यास्त्वत्तीरे मां स्तुवन्ति च ।
वसन्ति त्वन्मुखोऽहं च ह्याकल्पान्तं वसामि च ॥ २९
सर्वोपकारिणी त्वं च कल्पान्ते मुक्तिमेष्यसि ।
इत्युक्त्वानन्तदेवोऽसौ पद्मनाभो दयानिधिः ॥ ३० ॥
दिवाकरयतेर्देवो वरं दातुं मनो दधे ।

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये

सप्तमोऽध्यायः ।

अथ अष्टमोऽध्यायः ।

श्रीभगवानुवाच—
दिवाकरयतीन्द्रार्य मद्भक्तेष्वग्रणीर्भवान् ।
तातवल्लालयन् ध्यायन् प्रत्यक्षीकृतवानसि ॥ १ ॥
त्वमभीष्टं वृणीष्वाद्य दास्याम्यपि सुदुर्लभम् ।
[illegible]नादिभ्यस्त्वद्वशो ह्यवशोऽप्यहम् ॥ २

इत्युक्तो देवदेवेन पद्मनाभेन विष्णुना ।
दिवाकरस्तौलवोऽसौ यतीन्द्रः प्राह तं मुदा ॥ ३ ॥
अनन्तानन्तशयन पद्मनाभ सुरोत्तम ।
अणोरणीयान् महतो महीयानप्यहो भवान् ॥ ४ ॥
त्वमासीः कोमलो बालो मन्मनःप्रीतिवर्धनः ।
स एवाद्य भवान् विष्णो महतोऽपि महानभूत् ॥ ५ ॥
त्रियोजनोच्छ्रितं वृक्षं प्रविश्य विनिपात्य तम् ।
त्वां ध्यायतो मम पुरः प्रादुर्भूतो महाद्भुतः ॥ ६ ॥
योजनत्रयमावृत्य स्वस्वरूपेण माधव ।
यथा त्वं वामनः पूर्वं प्राप्य वैरोचनेर्महीम् ॥ ७ ॥
तदेव वर्धयन् रूपं महानासीरुरुक्रमः ।
वामदक्षिणपादाभ्यां लोकान् सप्त च सप्त च ॥ ८ ॥
आक्रम्य त्रितयं पादं बलेः शिरसि निक्षिपन् ।
दयया तं सुतलगं कृत्वेन्द्रमपि वर्धयन् ॥ ९ ॥
महद् रूपं समाश्रित्य तद्द्वारस्थो भवान् ननु ।
इन्द्रसंरक्षणार्थाय उपेन्द्रो वामनोऽभवत् ॥ १० ॥
स्वर्गे विराजसे देव वामनो वामरूपवान् ।
जानेऽहं त्वां कथं देव मनोवाचामगोचरम् ॥ ११ ॥

योजनत्रितयं व्याप्तं रूपमत्यद्भुतं हरे ।
कथं पश्यामि चक्षुभ्यां स्तौमि वाचार्चयामि वा ॥१२
प्रसीद चानुगृह्णीष्व भक्तरक्षणदीक्षित ।
अनेन विग्रहेण त्वामर्चयामि चिरं हरे ॥ १३ ॥
नृणामर्चयतां भूमन् पश्यतां पादपल्लवम् ।
मुक्तिदो भव देवेश मनुष्यार्हाकृतिर्भव ॥ १४ ॥
क्व ते बाहू क्व चरणौ क्व शिरः क्व च ते मुखम् ।
कथं नरास्त्वां पश्यन्ति विश्वरूपं रमापतिम् ॥ १५ ॥
एतन्मे वाञ्छितं देव चिराभिलषितं हरे ।
नाहं त्वदर्चनादन्यत् परं मन्येऽत्र देहि तत् ॥ १६ ॥
इत्युक्तोऽनन्तदेवोऽथ प्रत्यभाषत तं यतिम् ।
तवाभिलषितं दास्ये मामर्चय तपोधन ॥ १७ ॥
नान्यद् वाञ्छन्ति मद्भक्ता ऋते मत्सेवनं मुने ।
अहं दर्शनमात्रेण मुक्तिदानाय वै नृणाम् ॥ १८ ॥
त्वयार्चितोऽनन्तभोगे शयानः सुलभो नृणाम् ।
भविष्यामि कलौ योगिन् ततोऽत्राहं त्वदर्चितः ॥ १९ ।
वसाम्याकल्पमत्रैव दक्षिणाम्बुनिधेस्तटे ।
मनीषितं ममाप्येतच्चिरात् त्वद्वाञ्छितं मुने ॥ २० ॥

कियत्प्रमाणं मद्रूपं तवेष्टं तादृशोऽस्म्यहम् ।
ब्रूहि न त्वादृशो मेऽस्ति प्रीतिकृद् भुवि साम्प्रतम् ॥
इत्युक्तः स यतिः प्राह पद्मनाभं दयानिधिम्
हृष्यत्तनूरुहो भूत्वा प्रेमगद्गदया गिरा ॥ २२ ॥
प्रसीद देवदेवेश पुराण पुरुषोत्तम ।
यदि मामनुगृह्णीषे दयया तावकं विभो ॥ २३ ॥
अर्चनीयेन रूपेण नराणां सुन्दराकृतिः ।
विराजमानो विभवैः सर्वैर्देवैश्च सेवितः ॥ २४ ॥
मद्वेणुदण्डत्रितयमानमात्राकृतिर्भव ।
तदा त्वां सुलभं लोकाः पश्यन्त्यर्चन्ति सन्ततम् ॥२५॥
स्तुवन्त्यायान्ति गायन्ति मुच्यन्ते ननु ते नराः ।
दयां कुरु प्रसीदेशेत्यर्थितो यतिना हरिः ॥ २६ ॥
ओमित्युक्त्वा तदा मानं विधेहीत्याह तं विभुः ।
ततो दिवाकरो योगी शिरसादृत्य सादरम् ॥ २७ ॥
स्ववेणुदण्डमानेन मानातीतममानयत् ।
यावत् त्रिदण्डविक्षेपः कृतो यतिवरेण हि ॥ २८ ॥
तावत् सङ्कुच्य तद्रूपं ददृशे तादृशाकृतिः ।
विमाने पावने रम्ये द्वारत्रयविराजिते ॥ २९ ॥

वेणोरन्ते पुरो द्वारं वेण्वन्ते मध्यमं तथा ।
ततो वेण्वन्तरे द्वारमन्तिमं हि त्रिधा मितम् ॥ ३० ।
ददर्श स यतिस्तत्र कुण्डलीकृतविग्रहम् ।
अनन्तमुच्छ्रितफणामणिराजिविराजितम् ॥ ३१ ॥
मञ्चायितं मृदुतनुं श्वेतद्वीपमिवापरम् ।
तस्य भोगे शयानं च ददर्शानन्तमद्भुतम् ॥ ३२ ॥
श्रीपतिं प्रथमद्वारि दर्शनीयमुखाम्बुजम् ।
पद्मरागैरनर्घैश्च पुष्यरागैश्च मौक्तिकैः ॥ ३३ ॥
इन्द्रनीलैर्महानीलैर्गोमेदप्रवरैरपि ।
वज्रैर्मरतकैर्जुष्टं वैदूर्यैर्विद्रुमैरपि ॥ ३४ ॥
शोभितं मकुटं तस्य भासमानं श्रिया सदा ।
शीर्ष्णि तद् देवदेवस्य राजते द्यौरिवाद्भुतम् ॥ ३५ ॥
सुललाटं मुखं तस्य कस्तूरीतिलकाङ्कितम् ।
भ्रूयुगं देवदेवस्य जन्माद्यस्य यतः प्रभोः ॥ ३६ ॥
रक्तान्ते नयने तस्य आकर्णान्तं विराजिते ।
दयारसौघभरिते वीक्षणे कमलापतेः ॥ ३७ ॥
सुनासं मुकुरोद्भासिगण्डयुग्मविराजितम् ।
श्रोत्रे दृशोरायतने मकरायितकुण्डले ॥ ३८ ॥

बिम्बाधरश्रियाक्रान्तकुन्ददन्तौघविद्रुमम् ।
लावण्याम्भोनिधिं देवं मन्दहासमुखाम्बुजम् ॥ ३९ ॥
सुदर्शनाञ्चितं बाहुमेकं कृत्वोपबर्हणम् ।
सशङ्खमपरं बाहुं प्रसार्याजानुमण्डलम् ॥ ४० ॥
शयानं भोगिशयने कौस्तुभोद्भासिकन्धरम् ।
श्रीवत्साङ्कं श्रीनिवासमुरोविस्तृतमुज्ज्वलम् ॥ ४१ ॥
सुगन्धतुलसीजुष्टवनमालाविराजितम् ।
भासितं वैजयन्त्या च मालया मधुसूदनम् ॥ ४२ ॥
दयातरङ्गितापाङ्गवीक्षणेक्षितसेवकम् ।
ददर्श प्रथमद्वारि दिवाकरयतिर्हरिम् ॥ ४३ ॥
मध्यमद्वार्यपश्यत् तन्नाभिपङ्कजमद्भुतम् ।
यत्र जातस्त्रिलोकानां स्रष्टा स चतुराननः ॥ ४४ ॥
परितस्तस्य देवाश्च लोकपालाः सकिङ्कराः ।
तुम्बुरुर्नारदः सिद्धा गन्धर्वाश्चाप्सरोगणाः ॥ ४५ ॥
मीलिताक्षाः स्तुवन्त्येनं पद्मजेन सहात्र ते ।
उदरं सर्वलोकानां निवासनिलयं हरेः ॥ ४६ ॥
दर्शनीयं सुमध्यं तन्नितम्बार्पितमेखलम् ।
किङ्किणीदामसंशोभिघनपीताम्बरावृतम् ॥ ४७ ॥

ऊरू करिकराकारौ जानुचक्रयुगं शुभम् ।
क्रमवृद्धे च जङ्घे वै ददर्श पुरतो यतिः ॥ ४८ ॥
समैक्षतान्तिमद्वारि विलसत् पादपल्लवम् ।
रक्ताब्जराजत्सुतलं कोमलं मृदु मञ्जुलम् ॥ ४९ ॥
पद्मोर्ध्वरेखाविलसत्पादपद्मं जगत्पतेः ।
श्रीदेवी चैव भूदेवी दुर्गादेवी च सादरम् ॥ ५० ॥
कोमलाभ्यां स्वपाणिभ्यां सेवन्ते सततं मुदा ।
तं दृष्ट्वा वरदं देवं दर्शनीयशुभाकृतिम् ॥ ५१ ॥
त्रिवेणुमानप्रमितं कृतकृत्यो यतिस्तदा ।
चतुः प्रदक्षिणं कृत्वा चतुर्दिक्षु प्रणम्य च ॥ ५२ ॥
मुखनाभिपदाब्जं च नत्वा द्वारत्रयेऽपि च ।
प्रमोदसम्भृतो भूत्वा तस्थौ तत्सन्निधौ यतिः ॥ ५३ ॥
तमाह पद्मनाभोऽथ यतीन्द्रं तौलवं मुदा ।
दिवाकरयतीन्द्रात्र त्वं मामर्चय सुव्रत ॥ ५४ ॥
पुरात्र दक्षिणाम्भोधेस्तटे पुण्यतमे शुभे ।
वसाम्यहं नृसिंहात्मा तेन सार्धं ममार्चनम् ॥ ५५ ॥
कार्यं यतिवरात्रैव ततस्तुष्टोऽस्मि नान्यथा ।
पौष्कलोक्तेन मार्गेण कालेषु द्वादशस्वपि ॥ ५६ ॥

वैखानसोक्तैर्विविधैः शान्तिभिर्नियमैरपि ।
उत्सवैरपि नित्यैश्च पक्षमासाब्दसंज्ञितैः ॥ ५७ ॥
त्वयार्चनीयस्त्वद्दृश्यैस्तौलवैरपि मत्प्रियैः ।
नान्ये ममार्चका अत्र तौलवा एव मे प्रियाः ॥ ५८ ॥
त्वयात्रैवार्चितोऽहं वै मुक्तिमन्ते ददामि ते ।
मामत्र सेवमानानां सुलभो मुक्तिदोऽस्मि च ॥ ५९ ॥
इत्युक्त्वा तं यतिं देवः पद्मनाभः सनातनः ।
दयादृष्ट्या तं प्रपश्यन् स्मितसुन्दरलोचनः ॥ ६० ॥
तूष्णीमास्ते वरदराड् भोगीन्द्रशयनो हरिः ।

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये
अष्टमोऽध्यायः ।

अथ नवमोऽध्यायः ।

श्रीसूत उवाच-
तच्छ्रुत्वा देवदेवस्य वचनं तुष्टमानसः ।
दिवाकरयतीन्द्रस्तमर्चितुं समुपाक्रमत् ॥ १ ॥

नरसिंहं नमस्कृत्य पुरा सम्पूज्य भक्तितः ।
फणीन्द्रशायिनं देवं पद्मनाभमथार्चयत् ॥ २ ॥

ऋषय ऊचुः—
नरसिंहः कुतोऽत्रास्ते दक्षिणाम्बुनिधेस्तटे ।
कदा वात्रागतो देवः सूत नो ब्रूहि विस्तरात् ॥ ३ ॥

श्रीसूत उवाच—
पुरा कृतयुगे स्रष्टा लोकसृष्टिं हि वर्धयन् ।
मरीच्यत्र्यादिकान् पुत्रान् ससर्जादौ प्रजेश्वरान् ॥ ४ ॥
कश्यपोऽभून्मरीचेस्तु स उवाह त्रयोदश ।
दक्षकन्याश्च दित्याद्या दित्यां दैत्यान् महाबलान् ॥ ५ ॥
जनयामास मारीचो लोकोपद्रवकारिणः ।
सनकाद्यैः पुरा शप्तौ दित्यां जातौ महासुरौ ॥ ६ ॥
हिरण्याक्षो महावीर्यो हिरण्यकशिपुस्तथा ।
तत्र भूमिं हिरण्याक्षो निकुञ्च्य कटवद् बली ॥ ७ ॥
वार्धौ निमज्जयन् मेने जितोऽरातिर्मयेति च ।
देवैर्विज्ञापितो ब्रह्मा दध्यौ देवं जनार्दनम् ॥ ८ ॥
स चाणुरूपस्तन्नासाविवरात् पुरतोऽपतत् ।
गजमात्रः क्षणादासीत् ततः पर्वतसन्निभः ॥ ९ ॥

वराहरूपो ददृशे रोदसी व्याप्य तत्क्षणात् ।
तं दृष्ट्वा विस्मितो वेधाः सूकरं चाद्भुताकृतिम् ॥ १० ॥
स एवायं हरिर्नान्यो दैत्यहा मधुसूदनः ।
लोकत्राणाय सम्भूत इति मत्वा महामनाः ॥ ११ ॥
अस्तौषीत् तं सुरैः साकं वेदवाग्भिश्चतुर्मुखः ।
ब्रह्माणं हर्षयन् विष्णुर्जगर्ज घनवद् भृशम् ॥ १२ ॥
मा भैष्टेत्यभयं तेषां दत्त्वासौ जलमाविशत् ।
तत्र हत्वा हिरण्याक्षं वराहो लीलया हरिः ॥ १३ ॥
दंष्ट्राग्रेणावहन् भूमिमङ्केनालिङ्ग्य बाहुना ।
प्रादुर्भूतो हि देवानां ब्रह्मणश्च पुरो हरिः ॥ १४ ॥
यज्ञाङ्गः पूर्ववत् तां च स्थापयामास मेदिनीम् ।
लोकाः स्वकर्मनिरतास्ते समासत पूर्ववत् ॥ १५ ॥
हिरण्याक्षे हते तस्मिन् भ्रातरि क्रोधमूर्छितः ।
हिरण्यकशिपुर्मानी हन्तुं भ्रातृहणं रुषा ॥ १६ ॥
मातरं भ्रातृपुत्रांश्च समाश्वास्य क्रुधा ज्वलन् ।
तपः परममास्थाय मन्दरेऽतोषयद् विधिम् ॥ १७ ॥
समाः सहस्रं धैर्येण निराहारोऽस्थिशोषितः ।
तत्तपोष्मभिरत्युष्णैस्त्रयो लोकाः प्रतापिताः ॥ १८ ॥

देवास्तत्तपसोद्विग्ना ब्रह्माणं समुपेत्य च ।
प्रोचुः प्राञ्जलयो भीतास्तपसोऽयं निवार्यताम् ॥१९॥
अद्यैव प्रलयो नो चेद् भविता भुवनस्य हि ।
ततस्तदीप्सितं दत्त्वा तपसस्तं निवर्तय ॥ २० ॥
इत्युक्तो देवसङ्घैस्तु विमनाः स चतुर्मुखः ।
काश्यपं तमनुप्राप्य तपसस्तं निवर्त्य च ॥ २१ ॥
विधाय हेमदीप्ताङ्गं हिरण्यकशिपुं विधिः ।
दत्त्वा तदीप्सितं सर्वं स्वधाम प्रत्यपद्यत ॥ २२ ॥
ततो हिरण्यकशिपुः स्वर्गद्वारं समागतः ।
देवान् सशक्रान् विद्राव्य त्रैलोक्यैकाधिपोऽभवत् ॥२३॥
स एवाराध्यते सर्वैः सदैत्यसुरमानवैः ।
हव्यकव्यादिभोक्ता च स एवासीज्जगत्त्रये ॥ २४ ॥
स्वभ्रातृघ्नवधोद्योगं कुर्वन् रोषेण चोद्धतः ।
चकारान्वेषणं विष्णोः सर्वलोकेषु सञ्चरन् ॥ २५ ॥
क्वाप्यदृष्ट्वा च तं विष्णुमपश्यन्नारदं पथि ।
क्वासि कस्मादिहायातस्त्वं नारद वदस्व मे ॥ २६ ॥
इति पृष्टो मुनिः प्राह विष्णुलोकमितो गतः ।
द्रष्टुकामस्तमद्याहं नापश्यं तत्र तं हरिम् ॥ २७ ॥

विचिन्वन् बहुधा तत्र त्रिधामस्वपि तं हरिम् ।
निराशस्तमचक्षाणः सत्यलोकमितो व्रजे ॥ २८ ॥
इत्युक्त्वास्मिन् गते दैत्यः प्रहस्यासौ जगर्ज च ।
मया लोकाश्च विचिता नास्ति धामत्रयेऽपि सः ॥ २९ ॥
भ्रातृहा मे गतो दिष्टगतिं नास्त्यत्र संशयः ।
किमनेन प्रयासेन मम शत्रुवधैषिणः ॥ ३० ॥
स्थितश्चेदुपलभ्येत ततोऽसौ न हि जीवति ।
इति निश्चित्य दैत्येन्द्रो हिरण्यकशिपुः पुनः ॥ ३१ ॥
स्वर्गलोकमुपागत्य त्रिवर्गाभिरतोऽभवत् ।
तस्य पुत्रोऽग्रजो नाम्ना प्रह्लादो ह्लादयन् सुरान् ॥३२॥
आस्ते स्म लालितो नित्यं पितृभ्यां लालितो गुणैः ।
शण्डो मर्कश्चौशनसौ नीतिशास्त्रेषु कोविदौ ॥ ३३ ॥
उपाध्यायौ च तस्यास्तां विप्रौ वेदविचक्षणौ ।
त्रिवर्ग शिक्षया ह्यस्य प्रोचतुस्तौ पुनः पुनः ॥ ३४ ॥
प्रह्लादो दैत्यबालाश्च जगृहुस्तद्रुरूदितम् ।
नासौ गृह्णाति मनसा प्रह्लादो भगवत्प्रियः ॥ ३५ ॥
कदाचित् स्वसुतं दैत्यः स्वाङ्कमारोप्य लालयन् ।
कालेनैतावताधीतं प्रह्लाद वद मे पुरः ॥ ३६ ॥

यच्च सारतरं बुध्या गृहीतं ललितं तव ।
तद् ब्रूहि कर्णपीयूषं नन्दनानन्ददं मम ॥ ३७ ॥
इत्युक्तः सादरं पित्रा प्रह्लादो विनयान्वितः ।
हिरण्यकशिपुं तातमाहासौ कलभाषणः ॥ ३८ ॥
शृणु तातात्र यत् सारमधीतस्य श्रुतस्य च ।
नातिक्रामेद् गुरूक्तं च नानृतं च गुरोः पुरः ॥ ३९ ।
प्रसाधयेत् तोषयेत् तं गुरुमेव पुनः पुनः ।
शृणुष्व मदधीतेषु सारात् सारतरं गुरो ॥ ४० ॥
यस्यान्तः सर्वमेवेदं यश्च सर्वगतः सदा ।
यश्च सर्वमवाप्नोति यतः सर्वमितीर्यते ॥ ४१ ॥
यश्च सृष्ट्यादिकर्ता च साक्षी यः प्रेरकः सदा ।
स्वतन्त्रः परतन्त्रस्य नियन्तास्याखिलस्य च ॥ ४२ ॥
व्याप्तः सर्वत्रगो विष्णुर्ब्रह्मैव गुणवारिधिः ।
ज्ञानानन्दाकृतिर्देवः सर्वदोषविवर्जितः ॥ ४३ ॥
यस्तस्य चरितानां तु श्रवणं कीर्तनं हरेः ।
नाम्नां परमपुण्यानां तद्भक्त्याजिह्मयानिशम् ॥ ४४ ॥
स्वातन्त्र्यस्मरणं विष्णोः सर्वकार्येषु सर्वदा ।
तत्पादसेवने वाञ्छा तदर्चा सर्वदापि च ॥ ४५ ॥

प्रणतिस्तस्य सङ्भक्त्या तत्तन्त्रोऽहमिति स्मृतिः ।
सख्यं च सर्वदेवेषु तद्भावेष्वाश्रितेष्वपि ॥ ४६ ॥
स्वात्मसत्तादिकानां च तदधीनतयार्पणम् ।
इदं पितर्मयाधीतं सारात् सारतरं गुरो ॥ ४७ ॥
इत्युक्त्वा सोऽभवत् तूष्णीं प्रह्लादो भगवत्परः ।
हिरण्यकशिपुश्चापि प्रहस्याह सुतं तदा ॥ ४८ ॥
बालोऽयं मे प्रतिच्छन्नैर्ब्राह्मणैर्भिन्नधीरभूत् ।
नूनमेतन्न जानामि स्वभावाद् गुरुगौरवात् ॥ ४९ ॥
त्वयारिपक्षिणा विप्र कृतोऽयं रिपुरात्मजः ।
भीतिं विहाय धैर्येण यतोऽरिं स्तौति मत्पुरः ॥ ५० ॥
इत्युक्तः स गुरुः प्राह धैर्येण विनयेन च ।
अवधारय दैत्येन्द्र यथार्थं भाषितं मम ॥ ५१ ॥
विरुद्धमाचरन् प्राज्ञो जीवेत् त्वत्सेवकः कथम् ।
नोपदेशोऽयमस्माकं यद् ब्रूतेऽद्य सुतस्तव ॥ ५२ ॥
नास्मानृतेऽस्य शास्तारो विद्यन्ते तनयस्य ते ।
गुरुबद्धस्य शुश्रूषोः श्रद्दधानस्य सन्मतेः ॥ ५३ ॥
सम्यग् विचार्यतां तत्त्वं त्वत्सुतोक्तस्य कारणम् ।
इत्युक्तः स्वसुतं दैत्यो वीक्ष्य प्राहातिलालयन् ॥ ५४ ॥

कुत एष तवायातो बुद्धिभेदः कुमारक ।
न चेद् गुरूक्तं त्वं ब्रूहि हन्मि तं बुद्धिभेदकम् ॥५५॥
इत्युक्तः प्राह तं बालः प्रह्लादः पितरं तदा ।
गुरुर्गुरुतमो देवो देवासुरनृणामपि ॥ ५६ ॥
प्रेरकः सर्वबुद्धीनामानुगुण्येन चेश्वरः ।
वाचयत्यापि मां त्वां च कारयत्यखिलाः क्रियाः ॥५७॥
तमवेहि गुरुं मे त्वं सर्वदातारमच्युतम् ।
विष्णुं नारायणं देवं कुतो विप्रेषु कुप्यसे ॥ ५८ ॥
यस्य विष्णोर्मुखाज्जाता विप्रास्ते गुरवोऽभवन् ।
वेदवादरता नित्यं वर्णिनामापि चाग्रगाः ॥ ५९ ॥
विप्राः पूज्याश्च वन्द्याश्च सर्वदा सर्वदेहिनाम् ।
तस्मादाराधनीयेषु क्रोधो विप्रेषु नो भवेत् ॥ ६० ॥
तेषां तवापि मम च बुद्धिदो बोधकश्च सः ।
तमेव त्वं विजानीहि नारायणमनामयम् ॥ ६१ ॥
कुतो विप्रेषु ते क्रोधो ज्ञात्वा देवं जनार्दनम् ।
सुखी भव महाबुद्धे मारीचप्रियनन्दन ॥ ६२ ॥
इत्युक्त्वा पितरं पुत्रस्तूष्णीमासीत् प्रसन्नधीः ।
अथोवाचासुरः पुत्रं महाभागवतं कविम् ॥ ६३ ॥

प्रह्लाद शृणु मद्वाक्यं गुरूक्तं चादराच्छृणु ।
तदेव हितकृद् भूयादिह चामुत्र बालक ॥६४॥
स्वबुद्धिरुचितं नैव ब्रूयात् त्यक्त्वा गुरूदितम् ।
तस्माद् गुरूदितं श्रुत्वा श्रद्धयाधीहि तन्मनाः ॥६५॥
तदेव मन्मतं सर्वसिद्धिदं भवति ध्रुवम् ।
विप्र त्वमृजुबुद्ध्यैनं नानानीतिविशारदम् ॥६६॥
कुरु मे तनयं बालं विनीतं सुकुमारकम् ।
इति दत्त्वा गुरौ बालं स्वयमास्ते महाबलः ॥६७॥
ततः शण्डश्च मर्कश्च प्रह्लादं राजपुत्रकम् ।
आनीय स्वगृहं तत्र त्रिवर्गं तमवोचताम् ॥६८॥
न तत्र प्रीयते बालः प्रह्लादो भगवत्परः ।
व्यासक्ते स्वगुरौ क्वापि सङ्गताननुगृह्य सः ॥६९॥
प्रह्लादो बालकान् प्राह दयया समभिप्लुतः ।
बालाः शृणुत निःसारमस्माकं यद् गुरूदितम् ॥७०
अध्रुवे परतन्त्रेऽस्मिंस्त्रिवर्गे को रमेद् बुधः ।
पराधीनमिदं सर्वं सर्वैः किं नाम भूयते ॥७१॥
विद्वानत्र प्रबुध्येत पश्यन् प्रेत्य गतान् परान् ।
स्वार्थेष्विह प्रमत्तानामायुर्गच्छति वै वृथा ॥७२॥

अध्रुवेण शरीरेण स्वहितार्थमजानताम् ।
आयुश्चलं तथा भोगाः सम्पदः क्षणभङ्गुराः ॥ ७३ ॥
रक्तमांसपुरीषास्थिमेदोमज्जान्त्रसङ्कुलम् ।
नवद्वारं वायुधृतं चर्मणा बहिरावृतम् ॥ ७४ ॥
पूतिगन्धमनित्यं तन्मनुतेऽज्ञोऽहमित्यहो ।
सम्यग् विचार्यतां बाला देहोऽयं पाञ्चभौतिकः ॥ ७५
जायते वर्धते काले चलते ह्रसतेऽपि च ।
अनिच्छतां परित्यागं म्रियते प्रसभं नृणाम् ॥ ७६ ॥
जडं शुक्रं रजो वापि तस्य निर्मातृ नेष्यते ।
रोमरेखाग्रवपुषः स्पष्टं माता पितापि न ॥ ७७ ॥
तत्त्वात्मके शरीरेऽस्मिंस्तद्भिन्नश्चेतनात्मकः ।
अनात्मन्यात्मतन्त्रोऽसावात्मन्यस्तः परात्मना ॥ ७८ ।
अकर्शितो वर्धिताङ्गो जननीजाठराग्निना ।
सूतिकाले समाकृष्टो वायुनाधोमुखं बलात् ॥ ७९ ॥
सूतिकामातृपित्राद्यास्तं बहिर्नेतुमक्षमाः ।
तिष्ठन्ति केवलं खिन्नाः कर्तार इव चोद्यताः ॥ ८० ॥
शरीरं तन्महत् सूक्ष्ममार्गेण कथमापतेत् ।
न श्लोषितं नापि भग्नं न निस्सारं च संयतम् ॥ ८१ ।

विवृत्य सूक्ष्ममार्गं तमाक्रष्टा क इहेक्ष्यते ।
अहिंस्य मातरं चापि स्वयं देहेन संयुतम् ॥ ८२ ॥
पतन् भुवि सुखं दुःखं परिहर्तुमनीश्वरः ।
बाल्ययौवनवार्धक्येष्वस्वतन्त्रोऽसुरात्मजाः ॥ ८३ ॥
यथाकर्म यथायोनि सुखदुःखेऽनुभूय च ।
पुनश्च म्रियतेऽनिच्छन् परतन्त्रस्ततोऽर्भकाः ॥ ८४ ॥
न मुच्यते ज्ञानहीनो जातो जातो मृतो मृतः ।
अजो जीवोऽव्ययात्मापि कायसंसर्गदोषतः ॥ ८५ ॥
संसारेऽस्मिन् महाघोरे मृगतृष्णायिते नृणाम् ।
अनित्ये नित्यबुद्धीनामसुखे सुखमानिनाम् ॥ ८६ ॥
बाल्ये स्वरक्षणाशक्तिः क्षुत्पीडा रोदनं सदा ।
पिपीलिकास्तुदन्त्येनं मशका मत्कुणास्तथा ॥ ८७ ॥
मात्राद्यधीनः स्तन्यार्थी वमन् लिप्तो मलेन च ।
डोलाशयोऽशुचिर्बाल्ये सुखं किं ब्रूत बालकाः ॥८८॥
पौगण्डे चैव कौमारे तर्जनं ताडनं तथा ।
भयं मातापितृभ्यां च सर्वदा गुरुतो भयम् ॥ ८९ ॥
यौवने कामसन्तापस्तरुण्यासक्तिरुन्मदः ।
विषयेष्वतिसङ्गश्च तदर्थं चार्थसङ्ग्रहः ॥ ९० ॥

सेवकश्च पराधीनो नीचसेवातिदुःखितः ।
सुखवत् तन्मन्यमानः काममोहवशं गतः ॥ ९१ ॥
कामिनीप्रियकृन्नित्यं देशकालाविचारकः ।
व्यासज्जते हि नारीषु क्रीडाशाखामृगो यथा ॥ ९२
तप्यतेऽतुलतापेन तासामेवापरिग्रहे ।
उच्छिष्टश्चापि वार्धक्ये स्त्रीसुताद्यैर्विदूषितः ॥ ९३ ॥
रुग्णः स्वभरणाकल्यो लालाक्लिन्नो विदन्तकः ।
क्षुत्क्षामोऽत्याशया ग्रस्तो बधिरोऽन्धो गतस्मृतिः ॥९४
वृथा प्रलपते नित्यं सर्वैश्च परिहास्यते ।
किं सुखं स्याद्धि वार्धक्ये वदतासुरबालकाः ॥ ९५ ॥
सर्वमीशकृतं वित्त मत्तानामात्मविस्मृतेः ।
जीवानामल्पशक्तीनामहङ्कारहतात्मनाम् ॥ ९६ ॥
तिले तैलमिव क्षीरे घृतवत् सर्वगं सदा ।
स्वतन्त्रात् परतन्त्रस्य जन्माद्यस्य यतो भवेत् ॥ ९७
तं सर्वैरपरित्याज्यं सर्वदा सर्वधापि च ।
सुपर्ण स्वसखायं च सुपर्णोऽपि स्मरन् हरिम् ॥ ९८
तेनैवाघेन महता संसारनिरये पतन् ।
शोचत्यतो हरिं ध्यायेत् सर्वबन्धविमुक्तये ॥ ९९ ॥

धर्मश्चार्थश्च कामश्च यत्प्रीत्यै सुकृतं कृतम् ।
तमज्ञात्वा हि धर्मादिसाधनं न फलोन्मुखम् ॥ १०० ॥
न भवेदस्वतन्त्रस्य स्वतन्त्रप्रेरणादृते ।
प्रेरकः कारकः कर्ता न चेद् देवो जडा अमी ॥१०१॥
धर्मादयः फलं दद्युरशक्ताश्चेतनानुगाः ।
नैव स्वतन्त्रा जीवाश्च स्वदुःखक्षपणाक्षमाः ॥ १०२ ॥
स्वतन्त्रा यदि चात्मानस्तेषु दुःखादि नो भवेत् ।
न चाप्नोतीप्सितं भद्रं तद्दातान्योऽस्य नास्ति हि ॥
ततोऽस्य दाता सर्वस्य दुःखस्य च सुखस्य च ।
बन्धको मोचकोऽभिज्ञः कर्ता कारयिता प्रभुः ॥१०४॥
नियन्ता व्ययकृत् साक्षी चेतनाचेतनस्थितः ।
यदधीनं जगत् सर्वं सुरासुरनरादिकम् ॥ १०५ ॥
यत्प्रसादादभूद् ब्रह्मा रुद्रो यत्क्रोधसम्भवः ।
सुराः सर्वे यदङ्गेभ्यः स ब्रह्मा स हरिः स्मृतः ॥ १०६ ॥
तं जानीथैकमात्मानमन्या वाचो विमुञ्चथ ।
बालाः शृणुत मद्वाक्यं नातो वः स्याद्धितं परम् ॥
धर्मार्थकामैर्विहितैर्मुक्तिदो हरिरेव सः ।
नान्यः पन्था अयनायास्ति तस्माद् ज्ञेयो हरिः परः

तत् कर्म हरितोषं यत् सा विद्या तन्मातिर्यया ।
ततो भजध्वं देवेशं सर्वदातारमच्युतम् ॥ १०९ ॥
नारायणं महाज्ञेयमेतत् सारं मयोदितम् ।
तं विना धर्मकामार्थं पश्यामो न जडैः कृतम् ॥
ततो हरिं भजेद् भक्त्या प्रसादार्थमनन्यधीः ।
लोकद्वये नास्त्यलभ्यं पुरुषार्थेषु बालकाः ॥ १११ ॥
हितं श्रुत्वात्मबुद्ध्यैतद् विचार्याप्याचरिष्यथ ।
सारविद्याविदो यूयं नान्यथासुरबालकाः ॥ ११२ ॥
इत्युक्त्वा सोऽभवन्मौनी प्रह्लादो भगवत्परः ।
ततस्तमूचुस्ते बालाः प्रसन्नमनसो मुदा ॥ ११३ ॥
सत्यमेतत् त्वया प्रोक्तं सर्वतोभद्रमुत्तमम् ।
मनांसि नः प्रसन्नानि वयस्य वचसा तव ॥ ११४ ॥
गुरूक्तिजो गतो मोहस्तमः सूर्योदये यथा ।
तत् तथैव करिष्यामो हितार्थं यत् त्वयोदितम् ॥११५॥
मनः प्रसाद्यतां तात किञ्चित् सन्दिह्यतेऽत्र हि ।
कुतः प्राप्तमिदं ज्ञानं त्वया बालेन दुर्लभम् ॥ ११६ ॥
गुरुभिर्नोदितं ह्येतद् वक्ता नान्योऽस्ति नः परः ।
तदेतद् वद सत्यं नो येन त्वां विद्महे गुरुम् ॥ ११७ ॥

इत्युक्तः स च तान् प्राह हिरण्यकशिपोः सुतः ।
शृणुध्वं बालकाः पूर्वं पिता मे मन्दराचले ॥ ११८ ॥
यदा क्रोधात् तपस्तेपे देवसङ्घजिघांसया ।
शक्रस्तदन्तरं लब्ध्वा विलुम्पन् नगरं पितुः ॥ ११९ ॥
गृहीत्वा राजमहिषीं मातरं मे गतो दिवम् ।
नारदः प्राह तां दृष्ट्वा गर्भिणीं मम मातरम् ॥ १२० ॥
अनार्यजुष्टं कर्मेदं किं महेन्द्र तवोचितम् ।
न हीदृशं कृतं पूर्वैः परदारप्रधर्षणम् ॥ १२१ ॥
विसृजैनां द्रुतं शक्र यतस्त्वं धर्मरक्षकः ।
इत्युक्तः प्राह शक्रस्तं नाहमेनां प्रधर्षये ॥ १२२ ॥
गर्भोऽसौ वर्धतेऽस्यास्तु तेज उग्रं सुरद्विषः ।
यदा प्रसूते तनयं तं हत्वा मोचये त्विमाम् ॥ १२३ ॥
श्रुत्वा तद्वचनं प्राह प्रहसन् नारदो हरिम् ।
नायमर्हस्त्वया हन्तुं यतोऽसौ भगवत्परः ॥ १२४ ॥
मुञ्चैनां शक्र भद्रं ते सतीं परपरिग्रहम् ।
इत्युक्तमात्रे मुनिना विसृज्य जननीं मम ॥ १२५ ॥
गतः शक्रो दिवं तां च समानीय मुनिस्ततः ।
प्राहात्रैवोष्यतां भद्रे यावत् ते भर्तुरागमः ॥ १२६ ॥

सा तदोमिति तं तत्र शुश्रूषन्ती स्थिता शुभा ।
स तदास्यै मुनिः प्राह परतत्त्वार्थनिर्णयम् ॥ १२७ ॥
गर्भस्थं मां समुद्दिश्य केवलं कृपया मुनिः ।
काले व्यवहिते मातुर्विस्मृतं तदभूदहो ॥ १२८ ॥
मुनिना सुप्रसन्नेन दत्तत्वाद् विस्मृतिर्न मे ।
गुह्यमेतन्मया प्रोक्तं विस्रम्भार्थं हि वोऽर्भकाः ॥१२९।
न प्रकाश्यमिदं क्वापि कुरुताथो यथारुचि ।
इति प्रबोधिता बाला आसन् सन्मार्गगा यदा ॥१३०।
स्वोक्तं नैवाद्रियन्ते च तदा भीतो गुरुर्भृशम् ।
चरितं तस्य तद् ज्ञात्वा प्रह्लादं प्राह रोषितः ॥१३१।
प्रह्लाद नूनं बालास्ते त्वत्सङ्गाद् भिन्नबुद्धयः ।
बभूवुस्त्वं तु नास्माकं शिक्षार्होऽसि विरुद्धवाक् ॥
ततो राज्ञे निवेद्यैतत् सुखिनः स्याम नान्यथा ।
इति व्यवस्य राजानमूचतुः सम्भ्रमाद् द्विजौ ॥ १३३
तच्छ्रुत्वा तनयं स्वाङ्के निवेश्याह महासुरः ।
प्रह्लाद सुकुमाराङ्ग ब्रूहि सत्यं वचो मम ॥ १३४ ॥
केन त्वं विप्रलब्धोऽसि गुरुभ्यां वा प्रलोभितः ।
ब्रूहि तं हन्मि तरसा ऋजुभावो भवान् सुत ॥ १३५

इत्युक्तः प्राह पितरं प्रह्लादः सत्यभाषणः ।
शृणु तात प्रसीदेह कोऽन्योऽस्ति तमृते हरिम् ॥१३६॥
वक्ता वाचयिता कर्ता स्वतः कारयिता सदा ।
अहंममेत्यसद्बुद्धिदाता नारायणो हरिः ॥ १३७ ॥
तवापि मम चान्येषां साक्षी च प्रेरकश्च सः ।
हृषीकेशः स मे वक्ता स हि वाचयिता च माम् ॥
तमवेहि महाराज पुण्डरीकाक्षमच्युतम् ।
नारायणं परात्मानं भज त्वं भक्तवत्सलम् ॥ १३९ ॥
नित्यश्रियं स ते दद्यान्नान्यथा मम भाषितम् ।
हितमेतद् विजानीहि गुरो तात प्रसीद मे ॥ १४० ॥
इत्युक्तः कुपितो रोषान्निपात्य स्वाङ्कतः सुतम् ।
स एष विष्णुर्नः शत्रुर्नूनमत्र न संशयः ॥ १४१ ॥
न मे सुतोऽयं दैत्येन्द्रा हन्यतामेष निर्भयः ।
ममात्र पुरतो दृष्टो भवद्भिरविशङ्कितैः ॥ १४२ ॥
इत्युक्तमात्रे दैत्यास्ते शूलमुद्गरपट्टिशैः ।
कुठारैर्भिण्डिवालैश्च बिभिदुस्तं महाबलाः ॥ १४३ ॥
सर्वायुधानि भग्नानि तदङ्गस्पर्शमात्रतः ।
सर्पास्तदीरिता दष्ट्वा भिन्नदन्ता मृताश्च ते ॥ १४४ ॥

अग्नौ प्रवेशयामास स चाभूज्जलशीतलः ।
दक्षिणाब्धौ निपात्यैनं क्षितौ गिरिभिरातनोत् ॥१४५॥
तस्योपरि स वेगेन तत्क्षणाद् दृश्यते पुनः ।
ततोऽतिखिन्नो दैत्येन्द्रस्तमवध्यं विचिन्तयन् ॥१४६॥
विचार्य प्राह कुपितः क्व ते देवोऽसुराधम ।
वदाद्य हन्मि तं च त्वां मच्छासनपराङ्मुखम् ॥
मा विलम्ब द्रुतं ब्रूहि पश्याद्य मम पौरुषम् ।
एवमुक्तस्तदा पित्रा विनयानतकन्धरः ॥ १४८ ॥
प्रह्लादः प्राह दैत्येन्द्रं मा क्रोधस्ते हितं शृणु ।
त्वं चासि ब्रह्मणो नप्ता काश्यपो वेदपारगः ॥ १४९ ॥
वेदेष्वेषु सुमानेषु त्वं तु विष्णुं न पश्यसि ।
यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ॥१५०॥
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः ।
भुव्येतमेतं वायौ चाप्याकाशेऽप्सु च तं हरिम् ॥
वनस्पतिष्वोषधीषु चन्द्रे नक्षत्रमण्डले ।
एतं सर्वेषु भूतेषु ब्रह्म नारायणं परम् ॥ १५२ ॥
स्थितं वदन्ति तन्नाम्ना सर्वव्यापिनमीश्वरम् ।
तमिमं पश्य सर्वत्र चेतनेषु जडेषु च ॥ १५३ ॥

त्वयि मय्यसुरेष्वेषु स्तम्भकुम्भतृणादिषु ।
अस्ति नारायणो देवः सत्यमत्र न संशयः ॥ १५४ ॥
अक्रोधनः समश्च त्वं पितः पश्यसि तं हरिम् ।
इत्युक्तस्तनयेनाह क्रोधप्रस्फुरिताधरः ॥ १५५ ॥
सर्वगश्चेद्धरिः स्तम्भे कस्मादस्मिन्न दृश्यते ।
हन्मि त्वामद्य खड्गेन स पातु त्वामिह स्थितः ॥
इत्युक्त्वा क्रोधरक्ताक्षो युगान्ताग्निरिव ज्वलन् ।
खड्गं करालमाकृष्य कोशात् तं हन्तुमुद्ययौ ॥१५७॥
स्तम्भं च ताडयन्नाह त्वदीयं हन्मि चात्र तम् ।
इत्युक्ते शुश्रुवे तत्र भैरवो रव उच्छ्रितः ॥ १५८ ॥
कठोरः सर्वकर्णानां वज्रनिष्पेषनिष्ठुरः ।
ततो भित्त्वाप्ययःस्तम्भं प्रादुर्भूतो नृकेसरी ॥१५९॥
ब्रह्माण्डास्फोटसङ्काशं सिंहनादं नदन् मुहुः ।
नराकृतिर्मृगेन्द्रास्यो महोग्रनखरोऽद्भुतः ॥ १६० ॥
प्रलयानलसङ्काशज्वालामालोज्ज्वलाकृतिः ।
पिहितानि च चक्षूंषि कर्णौ च बधिरीकृतौ ॥ १६१ ॥
वेपथुश्च शरीरेषु दैत्यानामभवत् तदा ।
ततो हिरण्यकशिपुर्नृसिंहं तमवेक्ष्य च ॥ १६२ ॥

समुत्पपात तं हन्तुं क्रोधादुद्वृत्तलोचनः ।
ततस्तयोरभूद् घोरः समरो लोकभीकरः ॥ १६३ ॥
शूलपट्टिशनिस्त्रिंशैर्भिण्डिवालैर्महेषुभिः ।
देवासुरस्मयकरो यावत् सन्ध्या प्रवर्तते ॥ १६४ ॥
ततो जग्राह वेगेन हिरण्यकशिपुं हरिः ।
पादयोश्चैव केशेषु स्थित्वोरौ तमपातयत् ॥ १६५ ॥
द्वाभ्यां कराभ्यामुदरं बिभेदास्य नृकेसरी ।
नखैरद्भुताकारैर्द्वाभ्यामान्त्राणि सन्दधे ॥ १६६ ॥
दधार मालां तां कण्ठे नृसिंहोऽतिरुषा स्फुरन् ।
पश्यन्नेव नृसिंहं स निरुद्योगो जहावसून् ॥ १६७ ॥
निर्भया निर्जराश्चासन् हते तस्मिन् महासुरे ।
ततो नृसिंहं देवास्ते दृष्ट्वा तं भीषणाकृतिम् ॥ १६८ ॥
नोपासर्पन् यदा सर्वे ब्रह्मेन्द्रत्र्यक्षपूर्वकाः ।
नृसिंहमद्भुताकारं रमापि न तमाययौ ॥ १६९ ॥
तदा ब्रह्मा समालोच्य योऽसौ यद्रक्षको हरिः ।
ततस्तं प्रेषयामीति प्रह्लादं प्रैषयद् विधिः ॥ १७० ॥
प्रह्लादः प्रेषितस्तेन निर्भयोऽगात् तमीश्वरम् ।
प्रणम्य नरसिंहं तमस्तौद् भक्त्या स वैदिकैः ॥१७१॥

नृसिंहस्तेन तुष्टोऽभूत् प्रह्लादमुपलालयन् ।
ततो रमा तमापाशु नृसिंहं शान्तविग्रहम् ॥ १७२ ॥
ततो ब्रह्मादयो देवास्तमापुः परमं हरिम् ।
स्तुत्वा तं विविधैः स्तोत्रैः प्रसन्नं प्राह पद्मजः ॥१७३॥
लोकसन्तापनो देव त्वयायमसुरो हतः ।
निर्भयाश्च जनाः सर्वे सुराः स्वस्थमभूदिदम् ॥१७४॥
त्वद्भक्तं पाहि तत्पुत्रमवतारो यतस्तव ।
नित्यं सर्वावतारस्त्वं व्याप्तः कालाच्च देशतः ॥१७५॥
आविर्भावतिरोभावौ यथाकालं तवाच्युत ।
अजस्त्वममृतो देव इति विन्दन्त्यतः स्फुटम् ॥१७६॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
स्तोतुं त्वां कः क्षमो लोके प्रसीदेत्याह तं विधिः ॥
ततः प्रसन्नो भगवान् रमामङ्केन चोद्वहन् ।
मन्दस्मितमुखो भूत्वा नृसिंहः प्राह पद्मजम् ॥१७८॥
ब्रह्मन् लोकगुरुस्त्वं हि मयादौ विनियोजितः ।
यथोचितं कुरु त्वं मे प्रियः पुत्रोऽत्र साम्प्रतम् ॥१७९॥
वरं वरय भद्रं ते तव दास्याम्यभीप्सितम् ।
इत्युक्तस्तेन तुष्टेन लोकवृद्धिकृदात्मभूः ॥ १८० ॥

वव्रे लोकहितार्थाय वरं तस्याप्यभीप्सितम् ।
यतो वेलावने पुण्ये दक्षिणाम्बुनिधेस्तटे ॥ १८१ ॥
हत्वा हिरण्यकशिपुं तत्सुतं परिपालयन् ।
देवैरभ्यर्चितो वाग्भिर्दर्शनादघनाशनः ॥ १८२ ॥
प्रादुर्भूतोऽसि देवेश हिताय जगतां हरे ।
इतः पुण्यतमे क्षेत्रे लोकानां मुक्तिहेतवे ॥ १८३ ॥
निवसानेन रूपेण मुक्तिदो दर्शनान्नृणाम् ।
अनन्तशयनं नाम क्षेत्रं सुप्रथितं कलौ ॥ १८४ ॥
त्वमेव पद्मनाभोऽत्र शेष्यसे भक्तवत्सलः ।
अनन्तशयनोऽनन्तः पद्मनाभो नृकेसरी ॥ १८५ ॥
क्षेत्रेऽस्मिन् वस देवेश यदीष्टं मे प्रदास्यसि ।
नृसिंहः प्रार्थितस्तेन दत्त्वा तस्य च तद्वरम् ॥ १८६ ॥
तत्रैवास्ते रमानाथो नरसिंहो दयानिधिः ।
इत्येतत् सर्वमाख्यातं नृसिंहागमकारणम् ॥ १८७ ॥
भवभीतिहरं नृणां सर्वाभीष्टप्रदं सदा ।

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये
नवमोऽध्यायः ।

अथ दशमोऽध्यायः ।

ऋषय ऊचुः—

प्रागुदक्प्रवणे देशे क्षेत्रेऽस्मिन्नादिकेशवः ।
स एव चाद्यनन्ताख्यः क्षेत्रख्यातिकृदक्षरः ॥ १ ॥
आरात् काकाक्षिशैलस्य रामेणात्र कृतं पुरा ।
काकाक्षिशासनं तेन काकाक्षिगिरिरीर्यते ॥ २ ॥
तत्समीपेऽस्ति देवेशो भोगिभोगशयो हरिः ।
इत्युक्तं तु त्वया पूर्वं कुतोऽत्राविरभूद्धरिः ॥ ३ ॥
तदेतच्छ्रोतुकामानां सूत नो ब्रूहि विस्तरात् ।

श्रीसूत उवाच—

शृण्वन्तु मुनयः सर्वे वैभवं शेषशायिनः ॥ ४ ॥
पुरा ससर्ज भूतानि स्रष्टाङ्गेभ्यश्च चेतसः ।
वृद्धये सर्वलोकानां तिर्यङ्नरसुरादिकान् ॥ ५ ॥
येऽस्याहीयन्त केशास्ते अहयो बहवोऽभवन् ।
दृष्ट्वा तानुग्रधीरासीद् यदा लोकपितामहः ॥ ६ ॥
तदास्य मध्यकेशेन जातः केशीति चासुरः ।
आदिदैत्यो महाबाहुर्महाकायो महाबलः ॥ ७ ॥

स च तप्त्वा तपो घोरं ब्रह्मणो वरमाप ह ।
स्वरक्तपाते स्वजनिं सर्वावध्यत्वमेव च ॥ ८ ॥
ब्रह्मा च तद् ददौ तस्य स च लोकाधिपोऽभवत् ।
स च देवान् निराचक्रे स्त्रियो दैवीरधर्षयत् ॥ ९ ॥
नरानत्ति महाघोरो नागान् हन्ति महाबलः ।
विष्वक् प्रवर्धते नित्यं पुरा वृत्रो यथासुरः ॥ १० ॥
तेन भग्नाश्च बहुशो युद्धेषु सुरसत्तमाः ।
ब्रह्माणं समनुप्राप्य सर्वं तस्मै न्यवेदयन् ॥ ११ ॥
श्रुत्वा तत् सर्वमाख्यातं स्मृत्वा तस्याप्यवध्यताम् ।
क्षीराब्धिशायिनं देवमभ्यगात् तैः सहाब्जजः ॥ १२ ॥
तुष्टाव सर्वगोप्तारं देवं नारायणं विधिः ।
प्रीतः स्तुत्या ततः प्राह पद्मनाभः स पद्मजम् ॥ १३ ॥
कथं वध्योऽसुरो ब्रह्मन्नवध्योऽयं कृतस्त्वया ।
तथापि वो हितार्थं तं जेष्येऽतः शिवमस्तु वः ॥ १४ ॥
इत्युक्त्वानन्तशयनः पद्मनाभश्चतुर्भुजः ।
शङ्खचक्रगदापाणिः केशिहत्यै स केशवः ॥ १५ ॥
प्रादुर्भूतोऽस्य पुरतः प्राह तं केशिनं हरिः ।
मया युध्यस्व दैत्येन्द्र किमेभिः क्लेशितैस्तव ॥ १६ ॥

दर्पघ्नोऽहं त्वादृशानां निहन्ता मोहितात्मनाम् ।
इत्युक्तः सोऽसुरः क्रुद्धस्तमेवाभ्यपतद् रुषा ॥ १७ ॥
तयोर्युद्धमभूद् घोरं देवानां विस्मयप्रदम् ।
गदाभिर्मुसलैर्बाणैर्भिण्डिवालैश्च तोमरैः ॥ १८ ॥
शस्त्रास्त्रैर्बहुभिर्घोरैर्मुष्टिभिश्च परस्परम् ।
रक्तेऽस्य पातिते भूमौ पुनरुत्पत्स्यतेऽसुरः ॥ १९ ॥
इति मत्वा स जग्राह केशवः केशिनं तदा ।
केशी च केशवं बध्वा हस्ताभ्यां भुव्यपातयत् ॥२०॥
केशवः सहसोत्थाय तं निपात्य धरातले ।
शिश्ये तस्योपरि श्रीशो हरिर्विश्वम्भरोऽद्रिवत् ॥ २१ ॥
नोत्थातुमशकत् सोऽपि केशी नाम महासुरः ।
आसुरी नाम तत्पत्नी ग्रस्तं तं विष्णुनेक्ष्य सा ॥२२॥
क्षुभ्यमानाह्वयद् गङ्गां तयोर्भेदविधित्सया ।
सा चाहूता भयाद् गङ्गा भित्वा भूमिं जवान्विता ॥
ताम्रपर्ण्यां समुद्भूता तया साकं महौर्मिभिः ।
फेनैश्च बुद्बुदैः पूर्णा कराला वाहिनी द्रुतम् ॥ २४ ॥
आजगामाथ तां प्राह चासुरी द्रुतवाहिनीम् ।
त्वमेतौ भेदय क्षिप्रं जहि विष्णुं च मा चिरम् ॥२५॥

इत्युक्ता सा तया गङ्गा ताम्रपर्ण्या सहाययौ ।
भेदयन्ती भुवं वेगादापातालतलान्तरम् ॥ २६ ॥
वेगेन पातयन्ती च नगान् नानाविधानपि ।
प्रलयार्णवसङ्काशां जगतीं ग्रसतीमिव ॥ २७ ॥
म हारवां भीमवेगां दृष्ट्वा देवः स केशवः ।
औन्नत्यमभजत् किञ्चिद् भुवा सह जनार्दनः ॥ २८ ॥
गङ्गा तमुन्नतं प्राप्य स्खलन्ती भेत्तुमक्षमा ।
द्विधाभूता क्षणेनैषा दक्षिणोत्तरहस्तवत् ॥ २९ ॥
मालाकृतिर्बभौ गङ्गा शयानस्य हरेर्दृढम् ।
निष्प्रयत्नासुरी भीता पातालं समगात् ततः ॥ ३० ॥
ततो देवाः सगन्धर्वा हते तस्मिन् महासुरे ।
हरिणैवादिकेश्याख्ये निर्भया विज्वरास्तदा ॥ ३१ ॥
ववृषुः मसुनोवृष्टिमादिकेशिनिषूदने ।
तुष्टुवुर्विविधैः स्तोत्रैर्देवं नारायणं प्रभुम् ॥ ३२ ॥
नमस्तेऽनन्तशयन नमः केशिनिषूदन ।
मधुकैटभसंहारिन् मुरारे नरकान्तक ॥ ३३ ॥
क उपायं विजानाति त्वां विनासुरनिग्रहे ।
आपन्नार्तिहर स्वामिंस्तावकान् पाहि नः सदा ॥ ३४ ॥

महत्त्वं ते न जानन्ति ब्रह्मरुद्रादयः सुराः ।
मात्रापरोऽसि भगवन् रजांसि विममे ह्यपि ॥ ३५ ॥
भवद्गुणान् गणयितुं शक्तः को भुवनत्रये ।
तस्मात् त्वमेव सर्वेशः सर्वकर्ता च सर्वदृः ॥ ३६ ॥
त्वमस्मान् पाहि देवेश भयेष्वभयदो भवान् ।
इति स्तुतः सुरैः सर्वैरादिकेशव आह तान् ॥ ३७ ॥
आदिकेशी मयाक्रान्तः किमन्यद् वोऽस्ति वाञ्छितम् ।
तत् करोमि वदन्त्वद्य सन्देहो नात्र देवताः ॥ ३८ ॥
इत्युक्तास्ते सुरास्तेन समालोच्यातिशङ्किताः ।
आदिकेशिभयं स्मृत्वा तमूचुः करुणानिधिम् ॥ ३९ ॥
यदि तुष्टोऽसि देवेश केश्यङ्गेशाय केशव ।
एवं शेष्वात्र सततं समाक्रम्यासुरं हरे ॥ ४० ॥
नोत्थातव्यमितो देव समुद्रशयनो भवान् ।
यद्युत्थास्यसि देवेश स केशी नो हनिष्यति ॥ ४१ ॥
त्वयाक्रान्तो न चोत्तिष्ठेत् तस्मादस्मानव प्रभो ।
त्वं चास्मदर्चितोऽत्रैव दर्शनान्मुक्तिदो नृणाम् ॥४२॥
वसाकल्पं महाबाहो नान्यन्नो वाञ्छितं हरे ।
इत्युक्तः स तदा देवैरादिकेशिशयो हरिः ॥ ४३ ॥

प्राह तान् विबुधान् देवस्तथास्त्वेतन्मतं च मे ।
मामादिकेशिशायिनमुपास्ते भोगिराडपि ॥ ४४ ॥
पर्यङ्कायितभोगेन फणामण्डलमण्डितः ।
ततः शयेऽहमत्रैव समाक्रम्यादिकेशिनम् ॥ ४५ ॥
मा भैष्ट देवा नोत्थास्ये दर्शनान्मुक्तिदो नृणाम् ।
यतोऽहं वर्तये चाधःपातितं चादिकेशिनम् ॥ ४६ ॥
अनन्तभोगपर्यङ्के शये श्रीभूमिसेवितः ।
आदिकेशवनामाहमाद्यनन्ताभिधोऽस्मि च ॥ ४७ ॥
मम मालायिता गङ्गा ताम्रपर्णी च वै सुराः ।
स्नात्वैतयोर्जले पुण्ये सकृद्वा दर्शनान्मम ॥ ४८ ॥
मुक्तिं यान्त्यखिलान् भोगानिह भुक्त्वा चिरं नराः ।
इत्युक्तास्तेन देवास्ते दिवं जग्मुर्मुदान्विताः ॥ ४९ ॥
आद्यनन्ताभिधं क्षेत्रमादिकेशवसंश्रितम् ।
पावनं सर्वलोकानां मुक्तये तत् सहेतुकम् ॥ ५० ॥
श्रुत्वैतद्वैभवं चादिकेशवस्य सकृन्नरः ।
आद्यनन्तस्य माहात्म्यं सर्वपापैः प्रमुच्यते ॥ ५१ ॥

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये
दशमोऽध्यायः ।

अथैकादशोऽध्यायः ।

ऋषय ऊचुः—

क्षेत्रेऽस्मिन् पद्मनाभाख्ये दक्षिणाम्बुनिधेस्तटे ।
त्रिदण्डमानितश्वासौ यत्र शेते श्रियःपतिः ॥ १ ॥
दिवाकरार्थितो देवः श्रीभूमिभ्यां निषेवितः ।
अनन्तशयनाख्येऽस्मिन् क्षेत्रे पुण्याकरे शुभे ॥ २ ॥
कानि तीर्थानि सन्तीह पुण्यदानि सदा नृणाम् ।
देवर्षिगणजुष्टानि तानि नो वद विस्तरात् ॥ ३ ॥

श्रीसूत उवाच—

ह्रासप्तातिर्हि तीर्थानि पुण्यदानि शरीरिणाम् ।
येषु स्नानेन मुक्ताः स्युर्नराः सर्वाघकञ्चुकात् ॥ ४ ॥
आद्यं तु मत्स्यतीर्थं स्याद् यत्रानन्तशिरोऽभवत् ।
मत्स्याकृतिर्यत्र देवस्ताम्रपर्णीजलं गतः ॥ ५ ॥
महार्णवं समाविश्य हयास्यं वेदहारिणम् ।
हत्वा वेदान् समानीय दत्त्वा तान् ब्रह्मणे पुनः ॥ ६ ॥
देवानध्यापयामास ब्रह्माणं च सुरेश्वरम् ।
यतो जलचरं रूपं धृत्वाध्यापयते हरिः ॥ ७ ॥

देवा जलचराकारा अधीयन्ते तदाज्ञया ।
सर्वे चक्राङ्किता मत्स्यास्तत्र गङ्गाजले शुभे ॥ ८ ॥
ताम्रपर्णीसमायुक्ते देवा वै विहरन्ति हि ।
सहैव मत्स्यरूपेण हरिणा गुरुणा सह ॥ ९ ॥
ततस्तत्तीर्थमहिमा वर्णितुं केन शक्यते ।
देवैश्च मत्स्याकृतिभिर्हरिणा मत्स्यरूपिणा ॥ १० ॥
तदा समाश्रिता गङ्गा ताम्रपर्णीजलं शुभम् ।
तन्मत्स्यतीर्थमाख्यातं बहुमत्स्यात्मकं शुभम् ॥ ११ ॥
तन्मत्स्यपुच्छनिर्धूतजले स्नानं सकृद् यदि ।
पापबन्धाविनिर्मुक्तो मुक्तिमेति नरो ध्रुवम् ॥ १२ ॥
मत्स्यतीर्थे सकृत् स्नानं मत्स्यानां स्पर्शनं सकृत् ।
दर्शनं पद्मनाभस्य दुर्लभं तत् कलौ नृणाम् ॥ १३ ॥
यदि स्याद् दैवयोगेन स कृतार्थो न संशयः ।
तत्र स्नात्वा नरो भक्त्या पितॄणां तृप्तिहेतवे ॥ १४ ॥
कुर्याद्धिरण्यश्राद्धं च ब्राह्मणान् भोजयेत् ततः ।
कुर्याद्धिरण्यदानं च श्रियं मुक्तिं च विन्दति ॥ १५ ॥
ततो वाराहतीर्थं तु पद्मनाभस्य दक्षिणे ।
हिरण्याक्षवधार्थाय ब्रह्मनासासमुद्भवः ॥ १६ ॥

वराहोऽम्बुधिमाविश्य समुद्धृत्य वसुन्धराम् ।
उत्थितो भूवराहोऽत्र दक्षिणाम्बुनिधेस्तटे ॥ १७ ॥
भुवं प्रसारयामास श्रीवराहो यथा पुरा ।
श्रमापनोदनार्थं स लीलया तत्र संस्थितः ॥ १८ ॥
स्विन्नः स्वेदाम्बु दुधुवे यत्र तद् वै महत् सरः ।
जातं वराहस्वेदोत्थं वाराहं तीर्थमुत्तमम् ॥ १९ ॥
स्पर्शनात् सर्वपापघ्नं भुक्तिमुक्तिप्रदायकम् ।
विष्णोरङ्गुष्ठसम्भूता गङ्गा लोकैकपावनी ॥ २० ॥
विष्णोः सर्वाङ्गसम्भूतं वाराहं तीर्थमुत्तमम् ।
पुनाति भुवनं सर्वमिति किं चित्रमद्भुतम् ॥ २१ ॥
नरः स्नात्वा तु वाराहे तीर्थे गङ्गाधिके शुभे ।
सन्तर्प्य देवर्षिपितॄन् कुर्याद् भूदानमत्र तु ॥ २२ ॥
भूपतित्वमवाप्याथ वराहस्य प्रसादतः ।
मुच्यते नात्र सन्देहस्तस्य तीर्थस्य वैभवात् ॥ २३ ॥
पद्मनाभस्य पादाधः पादतीर्थं शुभावहम् ।
तीर्थपादपदाङ्गुष्ठजाता गङ्गैव सा ननु ॥ २४ ॥
तत्र स्नानं भवेत् साक्षाद् गङ्गास्नानं न संशयः ।
तत्र स्नात्वा नरो भक्त्या स्वपितॄंस्तर्पयेत् तिलैः ॥२५॥

पितॄन् सर्वान् समुद्दिश्य श्राद्धं विधिवदाचरेत् ।
पिण्डान् निवापयेत् तत्र विष्णुपादपुरो नरः ॥ २६ ॥
गयायां विष्णुपादे च श्राद्धं तेन कृतं भवेत् ।
तिलदानं प्रकुर्वीत सहिरण्यं तु तत्र वै ॥ २७ ॥
तत् तीर्थं पद्मनाभाख्यं नाभ्यां सरसि वै हरेः ।
यतस्तदुदभूत् पद्मं यत्र ब्रह्मा चतुर्मुखः ॥ २८ ॥
सम्भूतः स्तौति तं देवं तात तातेति वै मुहुः ।
पद्मनाभाख्यतीर्थं तत् पावनं पापनाशनम् ॥ २९ ॥
तत्र स्नात्वा नरो भक्त्या मुच्यते सर्वपातकैः ।
पीताम्बरयुगं दद्यादायुरारोग्यमाप्नुयात् ॥ ३० ॥
सघृतं परमान्नं तु ब्राह्मणान् भोजयेदिह ।
दद्याच्च दक्षिणां तेभ्यः पितॄणां तृप्तिहेतवे ॥ ३१ ॥
शङ्खतीर्थं वामभागे दक्षिणाम्बुनिधौ शुभम् ।
तत्र स्नात्वा नरो भक्त्या पितॄन् सन्तर्प्य चाम्बुधौ ॥३२॥
कुर्याद् रजतदानं च शङ्खदानं विशेषतः ।
तृप्यन्ति पितरस्तस्य चक्रपाणिः प्रसीदति ॥ ३३ ॥
ततः प्राचीदिशायां तु पुण्यतीर्थमनुत्तमम् ।
चक्रतीर्थमिति ख्यातं नराणां भयभञ्जनम् ॥ ३४ ॥

भूतप्रेतपिशाचाद्याः शाकिनीडाकिनीगणाः ।
मारीगणाश्च वेताला ग्रहाश्च ब्रह्मराक्षसाः ॥ ३५ ॥
यत्र स्नातं नरं दृष्ट्वा विद्रवन्ति हि दूरतः ।
तदेतच्चक्रतीर्थाख्यं विष्णुचक्रोद्भवं शुभम् ॥ ३६ ॥
चक्रेणावासितं चान्तः सर्वदा शासनाद्धरेः ।
चक्रतीर्थे नरः स्नात्वा सर्वरोगभयापहे ॥ ३७ ॥
मुच्यते सर्वपापेभ्यो भयाद् रोगेभ्य एव च ।
तत्र दद्यात् सवत्सां गां स्वर्णशृङ्गां विभूषिताम् ॥ ३८ ॥
ताम्रपृष्ठां रौप्यखुरां कांस्यदोहसमन्विताम् ।
पयस्विनीं च तरुणीं ततो मुच्येत बन्धनात् ॥ ३९ ॥
पितॄनुद्दिश्य कुर्वीत पार्वणं श्राद्धमत्र वै ।
मुच्यन्ते तत्क्षणादस्य पितरो नारकाद् भयात् ॥ ४० ॥
गुहातिगहना काचित् पुरतोऽस्य हि वर्तते ।
प्रवेशितोऽत्र देवेन योऽनन्तव्रतदूषकः ॥ ४१ ॥
कौण्डिन्यनामा विप्राग्र्यो नीतोऽनन्तांसनं प्रति ।
तत्र दृष्ट्वानन्तदेवं पद्मनाभं सनातनम् ॥ ४२ ॥
समस्तजगदाधारमद्भुतं तदनुज्ञया ।
पुनश्च भुवमागत्य कृत्वानन्तव्रतं शुभम् ॥ ४३ ॥

चतुर्दश समाः सम्यक् कृत्वा दिवमगाद् द्विजः ।
ततोऽनन्तव्रतं सर्वैः कार्यं सम्पत्प्रदं द्रुतम् ॥ ४४ ॥
मुक्तिं ददाति वै विष्णुर्येन तुष्टो न संशयः ।

ऋषय ऊचुः—

ईदृशं तत् कदा कार्यं पद्मनाभव्रतं शुभम् ॥ ४५ ॥
कुतो वादूषयद्विप्रो व्रतमेतच्छुभावहम् ।
कथं तमनुजग्राह पद्मनाभः स्वदूषकम् ॥ ४६ ॥
कथं चादर्शयत् तत्र स्वरूपं परमाद्भुतम् ।
तद् ब्रूहि सर्वं नः सूत श्रोतुं कौतूहलं हि नः ॥ ४७ ॥

श्रीसूत उवाच—

पुरा कृतयुगे विप्राः सुमन्तोस्तनयां द्विजः ।
शीलां सुशीलां कौण्डिन्य उपयेमे विधानतः ॥ ४८ ॥
तामादाय ययौ विप्रो गोरथेन स्वमाश्रमम् ।
मध्याह्नकाले तां तत्र रथे संस्थाप्य भूसुरः ॥ ४९ ॥
कर्तुं माध्याह्निकं कर्म सस्नौ सूर्यसुताजले ।
सा तु तत्र स्थितापश्यद् यमुनापुलिने शुभे ॥ ५० ॥
शुचीनां चित्रवस्त्राणां स्त्रीणां बृन्दं महोज्ज्वलम् ।
दृष्ट्वा प्रसन्नचित्ता सा ताः समागम्य चाब्रवीत् ॥ ५१ ॥

किमेतत् क्रियते नार्यो युष्माभिः सुमनोहरम् ।
ब्रूत मह्यं द्रुतं यूयं श्रोतुं कौतूहलं हि मे ॥ ५२ ॥

इत्युक्तास्ताश्च तामूचुर्भद्रेऽनन्तव्रतं शुभम् ।
क्रियतेऽस्माभिरत्रैव सर्वसम्पत्करं शुमम् ॥ ५३ ॥

इत्युक्ता प्राह शीला ताः कथं कार्यमिदं व्रतम् ।
विधानं कीदृशं तस्य कः कालः कार्यमत्र किम् ॥५४॥

इति पृष्टास्तदा नार्यः शीलामूचुर्मुदान्विताः ।
नभस्ये शुक्लपक्षे तु चतुर्दश्यां शुभे दिने ॥ ५५ ॥

पूजयेत् पद्मनाभं तमनन्तं पुरुषोत्तमम् ।
कृत्वा दर्भमयानन्तं फणासप्तकराजितम् ।५६॥

पीताम्बरधरं देवं पिङ्गलाक्षं चतुर्भुजम् ।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ॥ ५७ ॥

ध्यात्वावाह्यार्चयेद् देवं कलशे यामुने जले ।
चतुर्दशग्रन्थियुक्तं रक्तसूत्रं दृढं नवम् ॥ ५८ ॥

पूजयेन्नामभिर्दिव्यैश्चतुर्दशभिरीश्वरम् ।
तत् सूत्रं वामहस्ते च धृत्वा दद्यादुपायनम् ॥ ५९ ॥

शृणुयात् तत्कथां दिव्यां भुञ्जीयात् तन्निवेदितम् ।
व्रतमेतन्महापुण्यं महाभाग्यप्रदं सदा ॥ ६० ॥

श्रुत्वा शीला तु चक्रे तद् व्रतं कौतूहलान्विता ।
ताभिः प्रदत्तं सूत्रं सा कुङ्कुमाक्तं दृढं नवम् ॥ ६१ ॥
धृत्वा वामकरे शीला पुनर्गोरथमारुहत् ।
स्वभर्त्रा सहिता प्राप स्वाश्रमं तुष्टमानसा ॥ ६२ ॥
ददर्श तत्र कौण्डिन्यः स्वाश्रमे सर्वसम्पदः ।
मन्वानः स्वप्रभावोत्था बुभुजे तास्तया सह ॥ ६३ ॥
कदाचिद् बाहुमूलेऽस्याः सूत्रं तद् दृष्टवानृषिः ।
शङ्कितः प्राह तां शीलां किमिदं धार्यते त्वया ॥ ६४ ॥
सूत्रं बहुग्रन्थियुक्तं रक्तवर्णं हि वश्यदम् ।
धृतमेतत् त्वया नूनं मां वशीकर्तुकामया ॥ ६५ ॥
द्रुतं तत्कारणं ब्रूहि सत्यमेवाविशङ्किता ।
इत्युक्ता सा स्मितमुखी भर्तारमविशङ्किता ॥ ६६ ॥
बभाषे यत्प्रभावेन जाताः सम्पत्समृद्धयः ।
सोऽनन्तः सूत्ररूपेण धार्यते तन्मया ऋषे ॥ ६७ ॥
श्रुत्वैतद् वचनं तस्याः कोपसंरक्तलोचनः ।
कोऽनन्त इति साक्षेपं सूत्रमाक्षिप्य सत्वरम् ॥ ६८ ॥
वह्नौ चिक्षेप वेगेन निन्दन्नेव पुनः पुनः ।
शीला वेगात् प्रधावन्ती सूत्रमुद्धृत्य सत्वरम् ॥ ६९ ॥

क्षीरेणाप्लावयत् सद्यः सोद्वेगा सा ससम्भ्रमा ।
ततस्तत्कर्मणा तस्य नष्टास्ताः सम्पदोऽखिलाः ॥७०॥

ज्वालामालाकुलो वह्निर्ददाहास्य गृहाश्रमम् ।
द्विषन्ति सर्वे कौण्डिन्यं चोरैरपहृतं वसु ॥७१॥

ततो मुनिः सुनिर्विण्णः शीलयोक्तं स्मरन् मुहुः ।
पश्चात्तप्तोऽनन्तदेवं साक्षाद् ज्ञात्वा हरिं परम् ॥७२॥

तमदृष्ट्वा न भोक्ष्येऽहमनन्तं पुरुषोत्तमम् ।
तावन्निरशनं मे स्याद् यावत् पश्यामि केशवम् ॥ ७३ ॥

इत्युक्त्वानन्तमन्विष्यन् विवेश गहनं वनम् ।
रसालं गां वृषं चेभं खरं पुष्करिणीद्वयम् ॥ ७४ ॥

दृष्ट्वा क्रमेण तान् सर्वानपृच्छद् ब्रूत तन्मम ।
यद्यनन्तो भवद्भिस्तु दृष्टः स क्वनु वर्तते ॥७५॥

ते तमूचुरनन्तं तं न विद्मो नेक्षितश्च सः ।
एवं निराकृतः सर्वैश्चक्रतीर्थमुपागतः ॥७६॥

न शक्नोति पुरो गन्तुं निराहारोऽर्कतापितः ।
ध्यायन्ननन्तं देवेशं तस्थौ निर्विण्णमानसः ॥७७॥

शरीरं पतति ह्यत्र नानन्तो वीक्षितो मया ।
चलनेऽपि न शक्तिर्मे किं कार्यं स गतिर्मम ॥७८॥

इति चिन्ताकुले तस्मिन् पद्मनाभो दयानिधिः ।
प्रादुरासीत् पुरस्तस्य जरठद्विजरूपवान् ॥ ७९ ॥
एहि कौण्डिन्य तेऽनन्तं दर्शयामीति तं करे ।
गृहीत्वा प्रविवेशान्तर्गुहायां भक्तवत्सलः ॥ ८० ॥
स्वपुरं च स्वरूपं च दर्शयामास तस्य वै ।
स्वयं च तत्र स्वे रूपे प्राविशत् तस्य पश्यतः ॥ ८१ ॥
ततस्तुष्टमना भूत्वा कौण्डिन्यो ब्राह्मणोत्तमः ।
तुष्टाव पद्मनाभं तमनन्तं विश्वतोमुखम् ॥ ८२
सर्वलोकाश्रयं देवं श्रीभूमिभ्यां निषेवितम् ।
नमस्तेऽनन्त देवेश पद्मनाभ दयानिधे ॥ ८३ ॥
अजानतोऽपराधं मे क्षमस्व कृपया हरे ।
पापात्मा पापकर्माहं न जाने त्वामहं प्रभो ॥ ८४ ॥
त्वया संरक्षणीयोऽहं शरणागतवत्सल ।
ममाहमिति बुद्ध्याहमभिभूतोऽस्मि सर्वदा ॥ ८५ ॥
त्वदधीनमिदं सर्वं पश्यन्नापि निरन्तरम् ।
त्वयि भक्तिर्दृढा मेऽस्तु विस्मृतिर्मास्तु मे सदा ॥ ८६ ॥
तावकं मामवेक्षस्व नोपेक्षस्व कृपानिधे ।
इति स्तुतस्तमाहेदं वचोऽनन्तासनो हरिः ॥ ८७ ॥

क्षान्तमेव मया सर्वं त्वद्भक्त्या मुनिपुङ्गव ।
गच्छाश्रमं मयादिष्टः सर्वसम्पत्समावृतः ॥ ८८ ॥
कुरु तत्र व्रतं सम्यक् चतुर्दश समा द्विज ।
तेन तुष्टः प्रदास्यामि नक्षत्रस्थानमुत्तमम् ॥ ८९ ॥
मुक्तिमन्ते च ते विप्र नान्यथा मम भाषितम् ।
इत्युक्तस्तेन विप्रेन्द्रस्तमाह पुरुषोत्तमम् ॥ ९० ॥
चूतो वृषो गौः सरसी गर्दभो गज एव च ।
जरठोऽन्ते द्विजो दृष्टः के ते तान् वद मे प्रभो ॥ ९१ ॥
इत्युक्तः प्राह देवोऽपि कौण्डिन्यं मुनिसत्तमम् ।
विप्रश्चूतोऽदत्तविद्यो गौर्भूर्दत्तोषरा द्विजे ॥ ९२ ॥
मदो वृषः खरः क्रोधी कुञ्जरो धर्मविक्रयी ।
धर्मोऽधर्मश्च सरसी द्वे विजानीहि भूसुर ॥ ९३ ॥
ब्राह्मणोऽसावनन्तोऽहं गुहा संसारसागरः ।
गच्छाश्रममितः शीघ्रमित्युक्तः स तदा द्विजः ॥ ९४ ॥
क्षणेन स्वाश्रमं प्राप्य शीलां सम्भाव्य तद् व्रतम् ।
चकार तेन मुक्तोऽभून्महासंसारसागरात् ॥ ९५ ॥
एवंरूपा गुहा सा तु चक्रतीर्थपुरोऽस्ति हि ।
तत उत्तरतः किञ्चिद्धायव्येऽस्ति सरोद्वयम् ॥ ९६ ॥

धर्माख्यमेकमपरमधर्माख्यं च विश्रुतम् ।
स्नात्वा धर्माख्यसरसि धर्मजातं हरिं स्मरेत् ॥ ९७ ॥
धर्मे बुद्धिर्भवेत् तस्य धर्मवृद्धिश्च तस्य वै ।
स्नायादधर्मसरसि नाधर्मेऽस्य कदाचन ॥ ९८ ॥
रतिः सञ्जायते क्वापि पुण्यं पुष्करिणीद्वयम् ।
निदर्शनं धर्मवृद्धौ धर्मपुष्करिणीजलम् ॥ ९९ ॥
वर्धते धर्ममाक्रम्य पापवृद्धौ तथेतरत् ।
एतान्यष्टौ च तीर्थानि पुण्यानि परितो हरेः ॥ १०० ॥
पद्मनाभस्य देवस्य सन्ति मुक्तिप्रदानि हि ।
इन्द्रतीर्थं चाग्नितीर्थं यमतीर्थं च नैर्ऋतम् ॥ १०१ ॥
तीर्थं वरुणतीर्थं च वायव्यं तीर्थमुत्तमम् ।
उत्तरे धानदं तीर्थमैशानं तीर्थमुत्तमम् ॥ १०२ ॥
पूर्वादिदिक्षु कोणेषु तेषु स्नात्वा शुचिर्नरः ।
सम्पदो धर्ममैश्वर्यं धनवृद्धिं समश्नुते ॥ १०३ ॥
ततः परशुरामाख्यं तीर्थं रामविनिर्मितम् ।
दुर्गातीर्थं भगवतीतीर्थं चागस्त्यमुत्तमम् ॥ १०४ ॥
गदातीर्थं वेणुतीर्थं काश्यपं तीर्थमुत्तमम् ।
भारद्वाजं तथात्रेयं वैश्वामित्रं च गौतमम् ॥ १०५ ॥

जामदग्न्यं च वासिष्ठं मारीचं तीर्थमुत्तमम् ।
तीर्थमाङ्गिरसं चैव पौलस्त्यं तीर्थमुत्तमम् ॥ १०६ ॥
पुलहाभिधं क्रतोस्तीर्थं तीर्थं च भृगुसंज्ञितम् ।
कूर्मतीर्थं नारसिंहं तीर्थं भयनिवारणम् ॥ १०७ ॥
पञ्चपाण्डवतीर्थानि मुनिभिः संश्रितान्यपि ।
सन्ति तीर्थानि पुण्यानि भुक्तिमुक्तिप्रदानि च ॥१०८॥
दुर्लभं तेषु च स्नानमालस्याभिहतात्मनाम् ।
नराणामल्पसाराणां कलिकाले विशेषतः ॥ १०९ ॥
अष्टतीर्थेषु पुण्येषु परितः शेषशायिनः ।
मत्स्यतीर्थे च वाराहे पादाख्ये शङ्खचक्रयोः ॥ ११० ॥
तीर्थे च पद्मनाभाख्ये धर्माख्येऽधर्मसंज्ञिते ।
मालायितात्मनोर्गङ्गाताम्रपर्ण्योश्च केशवे ॥ १११ ॥
यः स्नात्वा दशतीर्थेषु पावनेषु विशेषतः ।
सेवेतानन्तशयनं नरसिंहं च भक्तितः ॥ ११२ ॥
स प्राप्नोति परं स्थानमिह चाखिलसम्पदः ।
तस्मात् पुण्यतमं क्षेत्रमनन्तशयनाभिधम् ॥ ११३ ॥
स्वयं व्यक्तोऽभवद् यत्र पुण्यक्षेत्रेऽम्बुधेस्तटे ।
पद्मनाभो नृसिंहश्च तत स्वयंव्यक्तमुत्तमम् ॥ ११४ ॥

क्षेत्राणामुत्तमं क्षेत्रं सर्वासिद्धिप्रदं शुभम् ।
महत्त्वमस्य क्षेत्रस्य को जानाति जगत्त्रये ॥ ११५ ॥
सकृद्वानन्तशयनं प्राप्यानन्तं निषेव्य च ।
कृतकृत्यो नरो भूयान्मुक्तिमेति न संशयः ॥ ११६ ॥
अनन्तशयनक्षेत्रमाहात्म्यमिदमद्भुतम् ।
यच्च पृष्टं भवद्भिस्तु तदेतत् कथितं मया ॥ ११७ ॥
य एतच्छ्रावयेद् भक्त्या शृणुयाद्वापि भक्तितः ।
तावुभौ कृतकृत्यौ हि मुक्तिमस्मात् समेष्यतः ॥
पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम् ।
विद्यार्थी प्राप्नुयाद् विद्यां माहात्म्यश्रवणाद्धरेः ॥
लिखित्वा यस्तु माहात्म्यं ब्राह्मणेभ्यः प्रयच्छति ।
स वै ज्ञानी भवेदन्ते मुक्तिं विन्दति मानवः ॥ १२० ॥
पूजयेत् पुस्तकं वापि गृहे संस्थाप्य भक्तितः ।
तत्रैव सम्पदः सर्वा नृत्यन्ति परमादरात् ॥ १२१ ॥
इदं पवित्रं पापघ्नं सर्वकालेषु यः पठेत् ।
स सर्वाः सम्पदो भुक्त्वा पद्मनाभप्रसादतः ॥ १२२ ॥
इहामुत्र सुखी भूयादमृतत्वं च गच्छति ।
इत्युक्तमेतद् वो विप्रा मया व्यासप्रसादतः ॥ १२३ ॥

अनन्तपद्मनाभस्य चरितं महदद्भुतम् ।
श्रुतं भवद्भिरखिलं कुशलानि भवन्तु वः ॥ १२४ ॥
इत्युक्तास्ते तदा विप्रा आनन्दाश्रुपरिप्लुताः ।
सूतं पौराणिकं सर्वे पूजयाञ्चक्रुरञ्जसा ॥ १२५ ॥
श्रुतं त्वत्त इदं सूत पुण्यं हरिकथामृतम् ।
कृतार्थाः स्म चिरं जीव हरिलीलामृतप्रदः ॥ १२६ ॥
इति तं नन्दयित्वाथ ते च सर्वे महर्षयः ।
माध्याह्नसवनायाशु प्रोद्यतास्तेऽभवन्मुदा ॥ १२७ ॥

इति श्रीब्रह्माण्डपुराणे श्रीमदनन्तशयनक्षेत्रमाहात्म्ये

एकादशोऽध्यायः ।

समाप्तं च श्रीमदनन्तशयनक्षेत्रमाहात्म्यम् ।

शुभं भूयात् ।

॥ श्रीः ॥

श्रीमज्जनार्दनवासुदेवाय नमः ॥

श्रीवल्कलक्षेत्रमाहात्म्यम् ।

(श्रीमज्जनार्दनक्षेत्रमाहात्म्यम्)

प्रथमोऽध्यायः

वन्दे सुन्दरराजं तं श्रीवराहात्मकं विभुम् ।
पावनागारनिलयं जनार्दनतनुं हरिम् ॥ १ ॥
सुपुण्ये नैमिशारण्ये शौनकाद्या महर्षयः ।
प्रातःसवनहोमान्ते सूतं पप्रच्छुरादरात् ॥ २ ॥
व्यासशिष्य महाप्राज्ञ सूत तद् वद विस्तरात् ।
वल्कलाख्ये महापुण्ये क्षेत्राणामुत्तमोत्तमे ॥ ३ ॥
दक्षिणाम्बुनिधेस्तीरे रामक्षेत्रे जनार्दनः ।
नित्यं वसति सर्वेषां दर्शनान्मुक्तिदो नृणाम् ॥ ४ ॥
इत्युक्तं हि त्वया पूर्वं क्षेत्रं तद् वल्कलाभिधम् ।
कुतोऽभूत् सर्वदेवेशः कुतोऽत्रास्ते जनार्दनः ॥ ५ ॥
क्षेत्रस्यास्य च माहात्म्यं श्रोतुमिच्छामहे वयम् ।
कति तीर्थानि सन्त्यत्र तत् सर्वं वद नो मुने ॥ ६ ॥

इत्युक्तो मुनिभिस्तत्र स्मृत्वा सूतो जनार्दनम् ।
रोमाञ्चिताङ्गो नत्वा तं प्राह तान् रोमहर्षणः ॥ ७ ॥
शृणुध्वं मुनयः सर्वे स्मारितोऽस्मि हरेः कथाम् ।
वक्ष्यामि भवतामद्य शृणुध्वं तदिहाद्भुतम् ॥ ८ ॥
वैजयन्त्यां सभायां हि ब्रह्मा लोकपितामहः ।
उपास्यमानो निखिलैर्देवैरिन्द्रपुरस्सरैः ॥ ९ ॥
रुद्रैर्वसुभिरादित्यैर्विश्वेदेवैर्मरुद्गणैः ।
गन्धर्वैश्चारणैः सिद्धैर्गुह्यकैरप्सरोगणैः ॥ १० ॥
नवप्रजेशैर्मुनिभिः पर्वतैः सरितां गणैः ।
सरोभिश्च समुद्रैश्च नागैर्यादोगणैरपि ॥ ११ ॥
सङ्कल्पैश्च विकल्पैश्च योगैरष्टाङ्गसंयुतैः ।
मूर्तिमद्भिः समस्तैश्च मासैः संवत्सरैरपि ॥ १२ ॥
सन्ध्याभिस्तिसृभिः कालैः षड्भिश्च ऋतुभिस्तथा ।
दिनैर्वारैस्तथा ऋक्षैर्योगैश्च करणैरपि ॥ १३ ॥
कलाकाष्ठामुहूर्तैश्च देवराजेन वायुना ।
सरस्वत्या च सावित्र्या गायत्र्या प्रणवेन च ॥ १४ ॥
तत्रास्ते हि मुदा ब्रह्मा सर्वलोकेश्वरेश्वरः ।
तदा महाभागवतो नारदः परमेश्वरम् ॥ १५ ॥

दृष्ट्वा वैकुण्ठगं देवं भूतिदं सर्वगं हरिम् ।
श्रीभूमिसहितं श्रीशं सच्चिदानन्दविग्रहम् ॥ १६ ॥
स्तुत्वा तन्नामभिर्नत्वा तेन चाप्याहृतो मुनिः ।
गोविन्द वासुदेवेति गायन्नेव मुदा हरिम् ॥ १७ ॥
महतीं मूर्छयित्वा तु त्रितन्त्रीं रणयन् मुहुः ।
नामकीर्तनसन्तुष्टः स्फुरदङ्गरुहो मुनिः ॥ १८ ॥
ध्यायंस्तमेव देवेशं विवशो हृष्टलोचनः ।
गानप्रियेण हरिणाप्यनुयातो निरन्तरम् ॥ १९ ॥
समागतो ब्रह्मलोकं सर्वे तं ददृशुस्तदा ।
ब्रह्मापि तं हरिं दृष्ट्वा सहैवानेन चागतम् ॥ २० ॥
तद्गानासक्तहृदयमाहूतमिव चागतम् ।
वैकुण्ठाद् योगिहृदयाद् रविबिम्बादतिप्रियम् ॥ २१ ॥
तन्नामगानस्थानं तदाश्रित्यायान्तमच्युतम् ।
स्वासनात् सहसोत्तस्थौ सर्वेऽपि सहसोत्थिताः ॥२२॥
ब्रह्माणो नव तं दृष्ट्वा ब्रह्माणं चोत्थितं तदा ।
अज्ञानात् तमदृष्ट्वेशं हरिं विधिपुरस्कृतम् ॥ २३ ॥
ब्रह्माङ्गजं मुनिं दृष्ट्वा केवलं शङ्कितास्ततः ।
किञ्चिदाक्षेपतः प्रोचुरनालोच्य पितामहम् ॥ २४ ॥

प्रत्युत्थास्यन्ति न क्वापि पितरः पुत्रमागतम् ।
सर्वलोकविरुद्धं हि कथमेतत् त्वया कृतम् ॥ २५ ॥
इत एवं हि मर्यादा भवेज्ज्येष्ठकनिष्ठयोः ।
त्वदीयो ह्याचरेद् यद्यदन्योऽप्याचरते जनः ॥ २६ ॥
लोकोऽयं नष्टमर्यादः सीदत्येव पितामह ।
अकार्यमेतद् भवता कथमत्र कृतं बत ॥ २७ ॥
इति तैरुदितं धाष्ट्यादज्ञात्वा चैव तत्कृतम् ।
नाक्षेप्यं महतां कृत्यमित्यज्ञैर्निर्भयैस्तदा ॥ २८ ॥
ब्रह्मा तदीरितं श्रुत्वा दृष्ट्वा महदतिक्रमम् ।
युक्तं च स्वकृतं स्मृत्वा तान् दृष्ट्वान्यायसंस्थितान् ॥
दृष्ट्वा लङ्घितमर्यादान्निर्भयांस्तान् प्रजापतीन् ।
बभाषे तांस्तदा ब्रह्मा विष्णुमायाप्रचोदितान् ॥ ३० ॥
मत्कृतं त्वविचार्यैव सहसा मानुषा इव ।
यदवोचन् भवन्तोऽत्र हेलनं मे तु तत् कृतम् ॥३१॥
ततो भवन्तो गच्छन्तु मानुषं लोकमद्य वै ।
शशाप तानिति ब्रह्मा ततो भीताः प्रजेश्वराः ॥ ३२ ॥
सत्यलोकाच्च्युताः शीघ्रं भुवं गन्तुं प्रवेपिताः ।
अहो कष्टमहो कष्टमहो कष्टमभूदिह ॥ ३३ ॥

यदा यादृग् भवेद्येषां तत्तु नावैति कोऽपि च ।
नारदागमनान्नोऽद्य महत्यापत् समागता ॥ ३४ ॥
सङ्गो भागवतानां तु मलघ्न इति तन्मृषा ।
बभूव विषमे काले सर्वं स्याद् विपरीतवत् ॥ ३५ ॥
धिग् बुद्धिमपि धिग् दाक्ष्यं धिक् चास्माकं प्रगल्भताम् ।
यदुक्तो लोककर्तासौ सर्वज्ञो युक्तकार्यकृत् ॥ ३६ ॥
महीयान् महतां चापि कुतोऽस्माभिर्विमोहितैः ।
हेलनं हि कृतं यस्मान्नान्यैरेवं कृतं बत ॥ ३७ ॥
तस्मात् ते सुखिनः सर्वे नो वयं भयवर्जिताः ।
महदुल्लङ्घनं लोके ह्यनर्थाय भवेद् ध्रुवम् ॥ ३८ ॥
किं कुर्मः क्व च गच्छामः कश्च नः शरणं भवेत् ।
गत्वा भुवं क्व गच्छामः कदास्यान्तो भवेच्च नः ॥ ३९ ॥
तत्र गत्वा च किं कार्यं तन्मुक्तिरचिराद् भवेत् ।
कुत्र कस्य प्रभावेन वक्ता नोऽस्य च को भवेत् ॥
स नारदो वा वक्ता स्याद् योऽभून्नो दुःखसूचकः ।
इत्यालोच्यावदन् सर्वे नारदं तं प्रजेश्वराः ॥ ४१ ॥
नमस्ते नारदमुने शीघ्रमाख्याहि मा चिरम् ।
अधोऽद्य पततां चैषां कथं स्यात् पुनरुत्थितिः ॥ ४२ ॥

क्व वा वासोऽस्तु नः सौम्य किं वा कार्यं च तत्र वै ।
तदेतत् सर्वमाख्याहि सर्वं जानाति वै भवान् ॥ ४३ ॥
आपन्नार्तिहरो देवस्तद्भक्तस्त्वं च तादृशः ।
इत्युक्तः शोकसन्तप्तान् प्रजेशान् वीक्ष्य नारदः ॥४४॥
स्वयं चापि शुचा तप्तः स्मृत्वा देवं जनार्दनम् ।
हार्दं च तस्य दयया स्वं ज्ञात्वा प्राह तानृषिः ॥ ४५ ॥
शुचं प्रशमयन्नेषां सुधामधुरया गिरा ।
भयं वो मास्तु वक्ष्यामि प्रदेशं वो हितं शुभम् ॥४६॥
गन्तव्यं ब्रह्मणः शापाद् भवद्भिर्भूतलं प्रति ।
श्रेयस्करं तद् भवति भवतां ब्रह्मणो वचः ॥ ४७ ॥
हितायैव हि पुत्राणां पितृसन्तर्जनं भुवि ।
तथाह्यत्र भवत्प्राप्तो निग्रहोऽनुग्रहाय वः ॥ ४८ ॥
तद् गच्छत भुवं शीघ्रं दक्षिणाम्बुनिधेस्तटे ।
रामक्षेत्रे सुपुण्येऽस्मिन् कण्वाश्रमसमीपतः ॥ ४९ ॥
सर्वदेवमयोऽश्वत्थः सर्वदा यत्र तिष्ठति ।
प्रयागेऽक्षयवटवत् सर्वसिद्धिप्रदः सदा ॥ ५० ॥
इतो गच्छन्तु तत्रैव श्रेयो भवति वो ध्रुवम् ।
श्रुत्वा तदीरितं तत्र ब्रह्माणो नारदं मुनिम् ॥ ५१ ॥

ऊचुः कथं तच्छ्रेयः स्यात् कुत्राश्वत्थः सुरार्चितः ।
भूमण्डले महाभाग पञ्चाशत्कोटिविस्तृते ॥ ५२ ॥
लक्षयोजनविस्तारे दक्षिणे वरुणालये ।
तत्तीरे कुत्र वा कण्वस्तिष्ठत्याश्रममण्डले ॥ ५३ ॥
अस्माकं तदभिज्ञानं कथं वात्र भविष्यति ।
तदुपायं वद मुने दीनानामकृतात्मनाम् ॥ ५४ ॥
भवाम येन सुखिनो न हि ते स्याद् वचोऽन्यथा ।
इत्यर्थितो नारदश्च प्राह तान् भाविकार्यवित् ॥ ५५ ॥
प्रजेशा वो भयं मास्तु च्युतो मे वल्कलो भुजात् ।
सम्प्रयाति भुवं विष्णोर्मायया चलितो जवात् ॥ ५६ ॥
अनुयात तमेवाशु यूयं सर्वेऽप्यशाङ्किताः ।
भवद्भिस्तत्र वस्तव्यः स पतेद् यत्र वल्कलः ॥ ५७ ॥
तद् वल्कलाभिधं क्षेत्रं पुण्यक्षेत्रं सुरार्चितम् ।
दक्षिणाम्बुनिधेस्तीरे भविष्यति सुपावनम् ॥ ५८ ॥
यत्रैवास्ते महाश्वत्थः शीघ्रसिद्धिप्रदो भुवि ।
यूयं वसत तत्रैव सिद्ध्यर्थं हि प्रजेश्वराः ॥ ५९ ॥
ब्रह्मणो यजमानस्य सुप्रसन्नो जनार्दनः ।
आयास्यत्यचिरात् तत्र कर्मणां फलदो हरिः ॥ ६० ॥

दर्शनान्मुक्तिदो नृणां सर्वकर्मसमर्चितः ।
असिश्च वरुणा चैव गङ्गा रामशरोद्भृता ॥ ६१ ॥
पातालाद् यत्र तिष्ठन्ति पर्ववृद्धियुताः शुभाः ।
पावनायैव लोकानां स्नातानामिह पर्वसु ॥ ६२ ॥
चतुर्मुखा तत्र गङ्गा सदा पापविनाशिनी ।
युष्मत्कृते चक्रतीर्थं साक्षाच्चक्रकृतं भवेत् ॥ ६३ ॥
पृथक् पातालगङ्गा च पातालाद् यत्र चोत्थिता ।
तद्धि क्षेत्रं महापुण्यं भवतां सिद्धिदं भवेत् ॥ ६४ ॥
क्षिप्रं प्रयात तद् यूयमित्युक्त्वा तान् प्रजेश्वरान् ।
नारदो रणयन् वीणां ध्यायन्नेव जनार्दनम् ॥ ६५ ॥
तन्नामान्यतिपुण्यानि सद्यः पापहराणि च ।
शुश्रूषूणां च मन्दानां पूर्णसन्तोषसम्भृतः ॥ ६६ ॥
मुनिर्महाभागवतो जगामाथ पितामहम् ।
ब्रह्माणस्ते ततस्तस्मात् तदुक्त्या तर्पितान्तराः ॥ ६७ ॥
च्युतास्तपोजनौ तीर्त्वा महर्लोकमतीत्य च ।
स्वर्गतास्तद् व्यतीत्याथ सूर्यादीनप्यतीत्य च ॥ ६८ ॥
अन्तरिक्षाच्च्युता भूमिं विविशुर्वल्कलानुगाः ।
स वल्कलोऽपि वेगेन तानाकृष्य प्रजेश्वरान् ॥ ६९ ॥

दक्षिणाम्बुनिधेस्तीरे कण्वाश्रमसमीपतः ।
सर्वदेवमयोऽश्वत्थो यत्रास्ते लोकपूजितः ॥ ७० ॥

दर्शनात् सर्वपापघ्नः शीघ्रसिद्धिप्रदो नृणाम् ।
अवतीर्याथ तत्रास्ते पञ्चक्रोशं समाक्रमन् ॥ ७१ ॥

नवापि तत्र ब्रह्माणो दक्षिणाम्बुनिधेस्तटे ।
विराजमानमश्वत्थं दर्शनान्मुक्तिदं नृणाम् ॥ ७२ ॥

दृष्ट्वा तं पुण्यनिलयं ब्रह्मविष्णुशिवादिभिः ।
देवैरिन्द्रादिभिश्चैव गन्धर्वैश्च महर्षिभिः ॥ ७३ ॥

स्कन्धोपस्कन्धपत्रेषु मध्याद्यन्तेषु संश्रितम् ।
गव्यूतिविस्तृतच्छायं निबिडं च महोच्छ्रितम् ॥ ७४ ॥

दृष्ट्वा सन्तोषमतुलं प्राप्य ते शुद्धचेतसः ।
ऊचुः परस्परं तत्र मुदितेन्द्रियवृत्तयः ॥ ७५ ॥

अहो भाग्यमहो भाग्यं यदभूद् दर्शनं हि नः ।
सर्वदेवाश्रयस्यास्य पिप्पलस्य महातरोः ॥ ७६ ॥

अत्र वासः कृतो येन स कृतार्थो भवेद् भुवि ।
ततोऽत्रैव निवत्स्यामः सर्वसिद्धिप्रदे शुभे ॥ ७७ ॥

इति निश्चित्य ते तत्र पिप्पलस्य महातरोः ।
समाश्रित्य च सुच्छायमुपासन्ते प्रजेश्वराः ॥ ७८ ॥

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये
प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

अथ प्रजेश्वरास्तत्र निवसन्तो मुदान्विताः ।
इतः किं कार्यमस्माभिरिति दध्युः स्वचेतसा ॥ १ ॥
तत्र चिन्तयतां तेषां प्रजेशानां पुरस्तदा ।
नारदो वृद्धविप्रात्मा कुशपाणिः शुचिव्रतः ॥ २ ॥
ब्रह्मतेजोऽग्निदुर्धर्षो ध्यायन् ब्रह्म सनातनम् ।
हृदब्जनिलयं विष्णुं गृणन्नुपनिषद्गणैः ॥ ३ ॥
गुह्यैस्तन्नामभिर्दिव्यैः स्मरन् सन्तुष्टमानसः ।
ददृशे पुरतस्तेषां महाभागवताग्रणीः ॥ ४ ॥
तं दृष्ट्वा पुरतो विप्रं वृद्धवैष्णवमुत्तमम् ।
ब्रह्मतेजोमयं शान्तमुद्यद्भास्करसन्निभम् ॥ ५ ॥
उत्थिताः सहसा सर्वे कृताञ्जलिपुटा मुदा ।
अश्वत्थतरुसुच्छायामाश्रित्योपनिवेश्य च ॥ ६ ॥

विधिवत् पूजयित्वा तमिदमूचुः प्रजेश्वराः ।
स्वागतं ते मुनिश्रेष्ठ कृतार्थास्तव दर्शनात् ॥ ७ ॥
वयमत्र न सन्देहः कुतो वा त्वमिहागतः ।
सिद्धिदोऽस्ति भवान्नूनमापन्नानां द्विजोत्तम ॥ ८ ॥
ब्रह्मशापविमूढानामागतानामिमां भुवम् ।
महदुल्लङ्घनादस्माद् येनोपायेन तारिताः ॥ ९ ॥
स्याम सत्यं गता भूयोऽप्यनुग्राह्याश्च वेधसा ।
तद् ब्रूहि करुणासिन्धो सर्वज्ञो हि भवान् ननु ॥ १० ॥
इति पृष्टः स तानाह विप्ररूपो विधेः सुतः ।
नारदः परमप्रीतः स्मृत्वा देवं जनार्दनम् ॥ ११ ॥
यूयं भागवताः सर्वे ब्रह्मपुत्राः प्रजेश्वराः ।
यदि मुह्यथ लोकोऽयं कां वा गतिमवाप्नुयात् ॥ १२ ॥
नूनं यन्मायया लोको मुग्धोऽयं मन्यते परम् ।
हन्तारं स्वं हन्यमानं तस्मै श्रीविष्णवे नमः ॥ १३ ॥
यन्नाभिपद्मसम्भूतो ब्रह्मा तद्दृशगोऽनिशम् ।
स्वतन्त्रेणास्वतन्त्रोऽयमीरितश्चेष्टतेऽपि च ॥ १४ ॥

तेन शप्ताः कथं ब्रूत यूयं वा शापमोहिताः ।
नान्योऽस्ति कर्ता जगतामृते तं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
एकः स्वतन्त्रः परमो हि विष्णु-
र्नान्यः स्वतन्त्रः परतन्त्र एव ॥ १५ ॥
निमित्तमात्रं विधिशर्वपूर्वान्
देवान् विधायैव स पूर्णकामः ।
थत्तेऽस्य सृष्टिस्थितिसंयमादीन्
विश्वस्य दुःखं च सुखं च भूयः ॥ १६ ॥
भयाभये वृद्धिमथापि हानिं
ज्ञानं तथान्यत् सृतिबन्धमुक्तीः ।
तमेव चाद्यं पुरुषं पुराणं
ज्ञात्वा प्रपद्येत विमुक्तिकामः ॥ १७ ॥
हरिं प्रपन्नो हि जनः स भूयो
न जायते नास्य भयं कुतश्चित् ।
ज्ञात्वा तमीशं पुरुषोत्तमं हि
तस्य प्रसादात् सुखमाप्नुवन्ति ॥ १८ ॥
वेदैरपि च वेदान्तैर्वेद्यो नारायणो हरिः ॥ १९ ॥

कात्स्न्र्येन यं वेदयितुं वेदैरपि न शक्यते ।
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥ २० ॥
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ।
प्रणवः सर्ववेदात्मा वाचको यस्य वै हरेः ॥ २१ ॥
सर्ववेदैकवेद्योऽसौ हरिर्नारायणः सदा ।
उपक्रमोपसंहारौ वेदानां हरिरोमिति ॥ २२ ॥
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ २३ ॥
यस्यान्तो नैव चादिश्च वासुदेवः सनातनः ।
कल्पान्ते शिष्यते योऽसौ कल्पादौ सृजतेऽखिलम् ॥
नारायणो वासुदेवस्तथा सङ्कर्षणः परः ।
प्रद्युम्नश्चानिरुद्धश्च मुक्तिदः सृष्टिकृत् पतिः ॥ २५ ॥
श्रीर्माया च जया चैव कृतिः शान्तिश्च शक्तयः ।
ताभिर्युक्तः स लोकस्य जन्मादिकृतसौख्यदः ॥ २६ ॥
यत्र प्रमाणं शास्त्राणि यो वाच्यः शब्दसञ्चयैः ।
आत्मा स्वतन्त्रः सर्वेशश्चिदानन्दमयो हरिः ॥ २७ ॥
यश्चानन्दगुणो ब्रह्म विजिज्ञास्यो जनार्दनः ।
यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ॥ २८ ॥

अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः ।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥२९॥
देवादीनां महाविष्णुर्वाच्यः सर्वैश्च नामभिः ।
प्रकृतिं स्वामवष्टभ्य सृजते हरते हरिः ॥ ३० ॥
प्रकृत्या गुणसम्पन्नान् देवमानुषदानवान् ।
अनादिकर्मसम्बद्धान् सर्गे सृष्ट्वा च देहिनः ॥ ३१ ॥
यथाकालं यथायोग्यं पुनः कर्माणि चेश्वरः ।
कारयित्वैव सर्वेषां कर्मणां फलदोऽपि सः ॥ ३२ ॥
निमित्तमात्रमन्ये वै सुखदुःखोपपत्तिषु ।
निमित्तीकृत्य भगवान् ब्रह्मादीन् देहिनो हरिः ॥ ३३ ।
स्वतन्त्र ईशः कुरुते सुखदुःखे भयाभये ।
ततो ध्यात्वा तमेवेशं प्रणतार्तिहरं हरिम् ॥ ३४ ॥
प्राप्नुवन्तु भवन्तोऽत्र क्षिप्रं क्षेत्रप्रभावतः ।
अश्वत्थोऽत्र महावृक्षः सर्वदेवाश्रयः सदा ॥ ३५ ॥
सद्यःसिद्धिप्रदो नृणां दर्शनात् परिसर्पणात् ।
नमस्कारात् तथा स्पर्शाद् वासादत्र च संश्रयात् ॥३६
अभूद् भाग्यवशादत्र वासो देवेरितो ननु ।
तमेव देवं ध्यायन्तो जपन्तोऽष्टाक्षरं मनुम् ॥ ३७ ॥

तिष्ठध्वमचिरेणात्र प्रसीदति जनार्दनः ।
प्राप्नुवन्तु भवन्तोऽत्राभीप्सितं तत्प्रसादतः ॥ ३८ ॥
तपोमूर्तिर्महादेवस्तपसाशु प्रसीदति ।
तस्यादौ नाभिपद्मस्थः किञ्चिन्नेक्ष्य पितामहः ॥ ३९ ॥
किं कार्यमुदपूर्णेऽस्मिन् मयैकेनेति चिन्तयन् ।
कृपया तेन हरिणा प्रोक्तस्तप तपेति च ॥ ४० ॥
केनाप्यहं समादिष्टस्तपेत्यादरतो ननु ।
तमेव तपसा विद्यां सोऽपनुद्याद् भयं मम ॥ ४१ ॥
इति निश्चित्य तपसा तमाराध्याभयोऽभवत् ।
तथा यूयं च तपसा तमाराध्य जनार्दनम् ॥ ४२ ॥
प्राप्नुताभीप्सितं काममत्र सर्वेश्वरं हरिम् ।
इत्युक्त्वा गन्तुमुद्युक्ते तस्मिन् विप्रवरे पुनः ॥ ४३ ॥
तमूचुः पलितं विप्रं प्रश्रयावनतास्तदा ।
भवतो दयया ब्रह्मन् तारिता दर्शनादपि ॥ ४४ ॥
योगोऽयं कथितः साधु त्वयैवातिदयालुना ।
स्नानमूलो ह्ययं ब्रह्मन् स्नानमूलाः क्रियाः शुभाः ॥
अत्रास्पृश्यमथापेयं वर्तते लवणार्णवे ।
नैवाम्भो दृश्यते क्वापि स्नानं वात्र कुतस्तपः ॥ ४६ ॥

वासो वात्र महाभाग तस्मादत्रोदकं बहु ।
लभेमहि यथा ब्रह्मन् तदादिशतु नो भवान् ॥ ४७ ॥
इति प्रार्थयतस्तांश्च त्रिकालज्ञो द्विजोत्तमः ।
निरीक्ष्य प्राह वृद्धात्मा नारदो ब्रह्मणोऽङ्गजः ॥ ४८ ॥
शृणुध्वं वचनं यूयं महाभागवतोत्तमाः ।
सत्यमेव भवत्प्रोक्तं नात्राम्भो विद्यते क्वचित् ॥ ४९ ॥
आपन्नार्तिहरो देवः प्रपन्नसुखदो हरिः ।
शं विधास्यति वो नूनमचिरेण जनार्दनः ॥ ५० ॥
तदीरितोऽहं वक्ष्यामि भवतां यद्धितं वचः ।
तद् द्रुतं नात्र सन्देहो भविता भवतामितः ॥ ५१ ॥
स्नानार्थमचिराद् गङ्गां पातालादुद्धरिष्यति ।
पवित्रमर्चिमच्चित्रं महावेगं सुदर्शनम् ॥ ५२ ॥
तीर्थार्थं भवतां देवः प्रेरयेत् स जनार्दनः ।
आगच्छेन्महतो वेगाच्चक्रं भगवदीरितम् ॥ ५३ ॥
युष्मदिष्टार्थदानाय यूयं तन्महदद्भुतम् ।
दृष्ट्वा तेजोमयं चक्रं मा भैष्टातः सुखं हि वः ॥ ५४ ॥
भवेच्चाभीप्सितं शीघ्रं तत्र पातालगङ्गया ।
सुदर्शनं समागत्य वसेत् तत्रैव सर्वदा ॥ ५५ ॥

दुर्लभं तत्र वै स्नानं भवन्तः कुर्वते सदा ।
विमुक्ता ब्रह्मणः शापात् सत्यं गच्छत नान्यथा ॥५६॥
इत्युक्तास्ते च संहृष्टा ध्यायन्तस्तं जनार्दनम् ।
आश्रित्याश्वत्थमूलं तत् तपश्चेरुः प्रजेश्वराः ॥ ५७ ॥

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये

द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः ।

नारदस्त्वेवमुक्त्वा तान् प्रजेशान् ब्रह्मणः सुतः ।
गृणन्नेतानि नामानि मलघ्नानि च शृण्वताम् ॥ १ ॥
नारायण हरे कृष्ण वासुदेव जनार्दन ।
गोविन्द पद्मनाभेति गायन् सन्तोषसम्भृतः ॥ २ ॥
वैकुण्ठं विष्णुनिलयं जगाम तमसः परम् ।
तत्र गत्वा जगन्नाथं श्रीपतिं भक्तवत्सलम् ॥ ३ ॥
स प्रणम्यास्तुवद् भक्त्या शुभैस्तन्नामभिर्गृणन् ।
ॐ नमो विष्णवे तुभ्यं नारायण नमोऽस्तु ते ॥ ४ ॥

स्यादों नमो भगवते वासुदेवाय चक्रिणे ।
नमः शुचिषदे तुभ्यं हंसाय परमात्मने ॥ ५ ॥
पराय ज्योतिषे तुभ्यं केशवाय नमो नमः ।
स्वयम्भुवे सृष्टिकर्त्रे नमः सङ्कर्षणाय च ॥ ६ ॥
हयग्रीवाय कृष्णाय दत्ताय कपिलाय च ।
शिवाय शिपिविष्टाय सर्वज्ञाय चिदात्मने ॥ ७ ॥
पञ्चविंशाय देवाय पञ्चकालात्मने नमः ।
वराहाय नृसिंहाय वामनाय नमो नमः ॥ ८ ॥
त्रिविक्रमाय रामाय नमो बुद्धाय कल्किने ।
नमो मत्स्याय कूर्माय धेनवे रसपायिने ॥ ९ ॥
कुमाराय नरायापि नमो नारायणाय ते ।
यज्ञाय यजमानाय यज्ञहोत्रे नमो नमः ॥ १० ॥
बलाय वृषभायापि शिंशुमारात्मने नमः ।
अजितायाप्यनन्ताय नमो रुद्राय मीढुषे ॥ ११ ॥
वामदेवाय चोग्राय शान्ताय प्रभवे नमः ।
हृषीकेशाय कृष्णाय पञ्चविंशाक्षरात्मने ॥ १२ ॥
छायाछायाद्वितीयाय सर्वकर्त्रे च साक्षिणे ।
कालावयवरूपाय कालचक्रधराय च ॥ १३ ॥

नमोऽस्तु ते सदा भूमन् प्रपन्नपरिपालक ।
परिपाहीश भक्तांस्त्वं सततं करुणानिधे ॥ १४ ॥
स्तुत्वैवं तं हरिं ध्यायन् गायन्नास्ते स नारदः ।
ततः प्रसन्नो भगवान् महाभागवतं कविम् ॥ १५ ॥
नारदं प्राह देवेशो मन्दस्मितमुखाम्बुजः ।
ब्रह्माङ्गज महाभाग सर्वलोकहिते रत ॥ १६ ॥
स्वागतं ते किमायातः कुतो वा किमपेक्षितम् ।
कच्चित् तेऽनामयं तात कच्चिल्लोकोऽद्य निर्भयः ॥१७॥
समास्ते निर्भया देवासुराः स्वस्थाः समासते ।
किं वा कार्यं मया लोके हिताय तव सर्वदा ॥ १८ ॥
ब्रूहि मे वाञ्छितं शीघ्रं प्रसन्नस्तत् करोमि ते ।
इत्युक्तो देवदेवेन विष्णुना प्रभविष्णुना ॥ १९ ॥
नारदः प्राह देवेशं भक्त्या सप्रश्रयो मुदा ।
सर्वज्ञ सत्यसङ्कल्प सर्वलोकहिते रत ॥ २० ॥
ब्रह्मादयः सुराः सर्वे विना त्वत्प्रेरणां क्वचित् ।
न शक्ताश्चलितुं वापि नैवास्त्यविदितं तव ॥ २१ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि त्वयि दृष्टे परावरे ॥ २२ ॥

किमभीप्सितमस्तीह विना त्वद्दर्शनं हरे ।
त्वां दृष्ट्वाद्य कृतार्थोऽस्मि नान्यत् पश्याम्यतोऽधिकम् ॥
भक्ताभीप्सितकल्पद्रुर्भवान् नूनं जनार्दन ।
न सीदन्ति च ते भक्ताः क्वापि लोके महेश्वर॥ २४ ॥
नारायणेत्यभिहिते गजेशेन द्रुतं हरे !
अशक्यं ब्रह्मरुद्राद्यैः सर्वैः सर्वोत्तम प्रभो ॥ २५ ॥
गजावनं हि कृतवान् कृपया भक्तवत्सल ।
कृत्यामात्रेयविहितां चक्रेणाशु निरस्य च ॥ २६ ॥
निरामयं तं नृपतिं चकृषे भक्तवत्सल ।
तथाधुनापि चक्रेण भक्तास्ते सृष्टिहेतवः ॥ २७ ॥
ब्रह्माणो नव विष्णो ते पालनीया जनार्दन ।
दृष्ट्वा मामुत्थितं देवं ब्रह्माणमविशङ्किताः ॥ २८ ॥
यदाक्षिपन् तदा ब्रह्मा शप्त्वा भूमिं गतान् व्यधात् ।
अहं यदृच्छया तत्र गतस्त्वां संस्मरन् भुवि ॥ २९ ॥
तान् दृष्ट्वातीव निर्विण्णान् दक्षिणाम्बुनिधेस्तटे ।
तीर्थमाकाङ्क्षतः स्नातुं प्रदेशे जलवर्जिते ॥ ३० ॥
समुद्रोदं विना देव तान् स्मरन्नहमागतः ।
भवेद् भद्रं हि युष्माकमचिरेण प्रजेश्वराः ॥ ३१ ॥

यूयं महाभागवताः सृष्टिकर्मणि योजिताः ।
भक्तार्तिभञ्जनो नूनं देवदेवो जनार्दनः ॥ ३२ ॥
चक्रपाणिर्महादेवः सत्यसङ्कल्प ईश्वरः ।
गङ्गामाकृष्य भवतां चक्रेणात्र रसातलात् ॥ ३३ ॥
तीर्थं करोति चक्राख्यं चक्रपाणिर्जनार्दनः ।
यत्र स्नानेन वो मुक्तिर्भविष्यति न संशयः ॥ ३४ ॥
तानित्युक्त्वाहमगमं भक्तवत्सल तेऽन्तिकम् ।
ममेप्सितमिदं देव कुरु शीघ्रं कृपानिधे ॥ ३५ ॥
प्रेष्यतां हेतिराजोऽयमचिरेण जनार्दन ।
शिवाय सर्वलोकानां पावनाय महाप्रभो ॥ ३६ ॥
यत्र कण्वाश्रमाभ्याशे त्वमश्वत्थात्मकः स्थितः ।
तत्र मे वल्कलं पूर्वमपतद् ब्रह्मभिः सह ॥ ३७ ॥
पञ्च क्रोशान् समाक्रम्य तत् पुण्यक्षेत्रमुत्तमम् ।
वल्कलाख्यं महादेव सद्यो मुक्तिप्रदं नृणाम् ॥ ३८ ॥
वरुणा चाप्यसी गङ्गा चमसे स्तां प्रजापतेः ।
ब्रह्मणो यजमानस्य प्रादुर्भूतो यदृच्छया ॥ ३९ ॥
भवानत्रास्यते देव सर्वकर्मफलार्चितः ।
इत्युक्तो नारदेनाथ देवदेवो जनार्दनः ॥ ४० ॥

मन्दस्मितमुखो भूत्वा प्राह नारदमीश्वरः ।
त्वमेव नारदमुने मम चित्तानुगः सदा ॥ ४१ ॥
ममेप्सितमिदं नूनं तत् करिष्ये त्वयेरितम् ।
तथैव भविता सर्वं यथोक्तं ते महामुने ॥ ४२ ॥
इत्युक्त्वा भगवान् विष्णुश्चक्रं चिक्षेप वेगतः ।
सुदर्शनं भगवता क्षिप्तं तेजोमयं महत् ॥ ४३ ॥
कोटिसूर्यौघरोचिष्मद् भ्राजमानं महाद्भुतम् ।
ज्वालामालाकुलं कल्पानलकान्तिसमुज्ज्वलम् ॥ ४४ ॥
मुष्णच्चक्षूंषि सर्वेषामशक्यमपि वीक्षितुम् ।
प्रलयानिलरंहोवत् सर्वेषामतिभीषणम् ॥ ४५ ॥
वैकुण्ठात् सत्यमागत्य तपोजनमहर्दिवः ।
समतीत्य भुवं भूमिमगमद् यत्र ते नव ॥ ४६ ॥
तपश्चरन्ति ब्रह्माणो वल्कलेऽश्वत्थमूलगाः ।
दक्षिणाम्बुनिधेस्तीरे पुण्यक्षेत्रे च पावने ॥ ४७ ॥
तत्रागते तदा चक्रे प्रलयानलसन्निभे ।
महारभससम्भ्रान्ता नेशास्तदभिवीक्षितुम् ॥ ४८ ॥
पिधाय ते स्वचक्षूंषि भयकम्पितमानसाः ।
मेनिरे प्रलयं प्राप्तं सम्भ्रमादतिमोहिताः ॥ ४९ ॥

क्षणेन ब्राह्मणप्रोक्तं स्मृत्वा सर्वे प्रजेश्वराः ।
प्रायेण तद्धरेश्चक्रमेतन्नास्त्यत्र संशयः ॥ ५० ॥
अन्यथा तादृशज्योतिस्सङ्गो वान्यस्य किं भवेत् ।
शिवाय नो भवेदेतन्नान्यथा ब्राह्मणोदितम् ॥ ५१ ॥
इति ते चिन्तयन्ति स्म नव तत्र प्रजेश्वराः ।
महर्जनस्तपस्सत्यवासिनो देवता दिवि ॥ ५२ ॥
दृष्ट्वा तेजोमयं चक्रं प्रलयानलरंहसम् ।
धावमानमसङ्गेन चिन्तयन्ति ततस्ततः ॥ ५३ ॥
किमिदं वा कुतो वा स्यात् कस्य हेतोः सुदर्शनम् ।
धावत्येवमसङ्गेन विष्णुहस्तविभूषणम् ॥ ५४ ॥
नासुराश्चाधुना सन्ति ह्यवध्या देवभीतिदाः ।
कुतो वा चक्रराजोऽयं प्रेषितश्चक्रपाणिना ॥ ५५ ॥
न जानीमो वयं सर्वे ब्रह्माद्यास्तन्मनीषितम् ।
शमस्तु सर्वलोकानामितश्चक्रागमाद्धरेः ॥ ५६ ॥
इत्युक्त्वा ते सुरास्तत्र ध्यायन्तो हरिमासत ।
एवं चिन्तयतां तेषां भित्त्वा भूमिं सुदर्शनम् ॥ ५७ ॥
रसातलं समागच्छद् यत्र भोगवती सरित् ।
उद्धृत्य सागरान् सर्वान् कपिलाग्निप्रदीपितान् ॥ ५८ ॥

तत्र षष्टिसहस्राणि जलमाकाङ्क्षताश्चिरात् ।
भस्मावशेषितान् दीनानाप्लाव्य स्वजलैः क्षणात् ॥
तत्र तैः सेव्यमाना सा राजते विष्णुपादजा ।
उत्पपात ततो गङ्गा चक्रसन्दर्शिताध्वना ॥ ६० ॥
भुवमागत्य तरसा महाचक्रेण भास्वता ।
निरुद्धवेगा सहसा पिप्पलच्छाययावृता ॥ ६१ ॥
तस्थौ कासाररूपेण सुधाकल्पोदपूरिता ।
मुक्तवेगं ततश्चक्रं दर्शनीयं नृणामपि ॥ ६२ ॥
सहस्रपत्रकमलमिव तत्राम्भसि स्थितम् ।
दृष्ट्वा तदद्भुतं सर्वे ब्रह्माणो नव ते ततः ॥ ६३ ॥
कृतार्थास्तर्पिताः सर्वे पूर्णसन्तोषसम्भृताः ।
तुष्टुवुश्चक्रराजं तं विष्णुहस्तविभूषणम् ॥ ६४ ॥
नमो नमः सहस्रार साधुलोकभयापह ।
दितिजौघाभिष्टुतात्मन् कालरूप महोज्ज्वल ॥ ६५ ॥
जगत्क्षेमाय भगवान् दधार त्वां सदा हरिः ।
इडस्पते नमस्तुभ्यं स्वस्तिदाय सतां सदा ॥ ६६ ॥
महिमानं तव स्तोतुं कः शक्तो भुवि वा दिवि ।
गीतं निगमसङ्घैश्च सर्वतः सादरं प्रभो ॥ ६७ ॥

चरणं पवित्रं विततं पुराणं
येन पूतस्तरति दुष्कृतानि ।
तेन पवित्रेण शुद्धेन पूता
अतिपाप्मानमरातिं तरेम ॥ ६८ ॥

लोकस्य द्वारमर्चिमत् पवित्रं
ज्योतिष्मद् भ्राजमानं महस्वत् ।
अमृतस्य धारा बहुधा दोहमानं
चरणं नो लोके सुधितां दधातु ॥ ६९ ॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
तमो हर त्वं महसा ब्रह्म तेन पुनीमहे ॥ ७० ॥
यत् ते पवित्रमर्चिवदग्ने तेन पुनीहि नः ।
त्वयातसतनुर्लोके यः स ब्रह्म न चाश्नुते ॥ ७१ ॥
त्वदङ्कशिरसो देवास्त्वदङ्कितभुजा द्विजाः ।
न स्पृष्टा ये त्वया लोके स्पर्शस्तेषां च गर्हितः ॥
सुनाभ पद्मनाभेष्ट शं नोऽद्य भविता त्वया ।
त्वन्नामप्रथितं तीर्थमिदमत्र वसेद् भवान् ॥ ७३ ॥
चक्रतीर्थमिति ख्यातं नित्यं त्वत्पादसम्भवम् ।
प्रथितं सर्वलोकेषु पावनानां च पावनम् ॥ ७४ ॥

यत्र स्नानाद् वयं सत्यमाप्नुमस्त्वत्प्रसादतः ।
इत्युक्तो हेतिराजस्तानोमित्युक्त्वा तिरोहितः ॥ ७५ ॥
तत्रैवास्तेऽनिशं तीर्थे स्पर्शनात् पापनाशकृत् ।
ब्रह्माणस्ते नवाप्यत्र यदा चक्रानुमोदिताः ॥ ७६ ॥
सस्नुस्ते शुद्धवपुषो जवादस्मान्मुदान्विताः ।
सत्यलोकं ययुः शीघ्रं ब्रह्मणा तेन मोदिताः ॥ ७७ ॥
तीर्थस्यास्य प्रभावेन स्थितास्तत्र यथापुरा ।
चक्रतीर्थस्य माहात्म्यं महापुण्यप्रदं नृणाम् ॥ ७८ ॥
वल्कलागमनाच्चैव यत्र क्षेत्रमभूच्छुभम् ।
तदेतत् कथितं विप्राः किमन्यच्छ्रोतुमिच्छथ ॥ ७९ ॥

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये

तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः ।

ऋषय ऊचुः—
व्यासशिष्य महाप्राज्ञ श्रुतोऽस्माभिर्भवन्मुखात् ।
चक्रतीर्थस्य महिमा तस्य चाप्यागतिक्रमः ॥ १ ॥

अत्यद्भुततमो लोके सर्वेषां विस्मयप्रदः ।
अधुना श्रोतुमिच्छामश्चेममर्थं चिरेप्सितम् ॥ २ ॥
वल्कलाख्ये महापुण्ये चक्रतीर्थोपशोभिते ।
क्षेत्रोत्तमे कदा ब्रह्मा समागम्यायजद्धरिम् ॥ ३ ॥
वरुणा चाप्यसी गङ्गा चमसे चास्थिताः सदा ।
ब्रह्मणो यजमानस्य वर्तमाने क्रतूत्तमे ॥ ४ ॥
प्रादुरासीद् विराड् देवो देवदेवो जनार्दनः ।
वल्कलाख्यं च यत् क्षेत्रं तज्जनार्दनसंज्ञितम् ॥ ५ ॥
समभूत् प्रथितं लोके कीर्तनात् पापनाशनम् ।
एतदन्यच्च नः सर्वं विस्तरेण महामते ॥ ६ ॥
शुश्रूषतां समाख्याहि जनार्दनकथां शुभाम् ।
शृण्वतां नो न वै तृप्तिः शुश्रूषा चाभिवर्धते ॥ ७ ॥
रसज्ञः को नु तृप्येत विना जडमतीन् भुवि ।

श्रीसूत उवाच

शृणुध्वं मुनयः सर्वे जनार्दनकथां शुभाम् ॥ ८ ॥
यां श्रुत्वा मुच्यते लोको जन्ममृत्युभयादितः ।
सर्वलोकाधिपो ब्रह्मा सर्वज्ञः कमलासनः ॥ ९ ॥

सर्ववेदोदितं ब्रह्म चिन्तयन् सततं हरिम् ।
सर्वावतारवित् तस्य तनयोऽर्चन् हरिं सदा ॥ १० ॥
विविधाभिर्विचित्राभिः प्रजाभिः संस्तुतं विभुम् ।
स्वात्मन्यचिन्तयच्छुद्धसत्त्वोद्रिक्तः पितामहः ॥ ११ ॥
भृगुर्यदा शशापैनं स्वजायाघ्नं हरिं रुषा ।
आसुरेण स्वभावेन शशापाभिमुखः पुनः ॥ १२ ॥
भृगुमेव गृहीत्वा तमपस्मारं व्यधाद् द्रुतम् ।
एवमेव हि लोके स्यान्महदुल्लङ्घने फलम् ॥ १३ ॥
सर्वे देवाश्च निर्विण्णास्तं दृष्ट्वा भृगुसङ्कटम् ।
क्षीराब्धेस्तीरमागत्य प्रतोष्य हरिमीश्वरम् ॥ १४ ॥
प्रोचुस्त्वन्मुखजं विप्रं सङ्कटान्मोचय प्रभो ।
त्वया चैव त्वदीयैश्च पूज्यन्ते ब्राह्मणाः सदा ॥ १५ ॥
नो चेदद्यैव मर्यादा भिन्ना स्यात् त्वत्कृते हरे ।
इत्युक्तः स सुरैर्देवो मोहयंस्तानुवाच ह ॥ १६ ।
नित्यावियुक्तया देव्या श्रिया मे विरहो यदा ।
तदा स्युर्निर्वृता देवा भृगुश्चापि भवेत् सुखी ॥ १७ ॥
वियोगोऽस्त्विह दम्पत्योरिति शप्तं हि तेन वै ।
तत् करिष्यामि वः प्रीत्यै भवतामीप्सितं सुराः ॥ १८ ॥

इति ब्रुवाणे देवेशे सम्भ्रान्ता देवतागणाः ।
विषण्णचेतसो भीताः परिम्लानमुखाम्बुजाः ॥ १९ ॥
किञ्चिद् वदन्ति नैवैते भयाद् द्रष्टुमनीश्वराः ।
तान् दृष्ट्वातीव निर्विण्णान् सुरान् स जगदीश्वरः ॥
प्राह तान् सत्यसङ्कल्पः सुरानाप्याययन् गिरा ।
मा भैष्ट देवाः सर्वेऽत्र मदुक्तं नान्यथा क्वचित् ॥२१॥
विप्रशापो गृहीतो मे विप्रो भूयाच्च विज्वरः ।
न वियोगो ममास्तीह श्रिया देव्या कदाचन ॥ २२ ॥
श्रीनिवासः श्रीधरोऽहं प्रलये सर्वदापि च ।
तथाप्यहं चरिष्यामि वियुक्तो रमया क्वचित् ॥ २३ ॥
पौलस्त्यपीडिता यूयं यदा ह्यर्थयथ स्वयम् ।
तदा दाशरथिर्भूत्वावतरेयमहं भुवि ॥ २४ ॥
श्रीश्च भूयात् तथा सीता भूमिजा जनकान्वये ।
आवां च दम्पती तत्र वियुक्ताविव भूतले ॥ २५ ॥
दर्शयावस्ततो यूयं मा भैष्टातः शमस्तु वः ।
इत्युक्त्वान्तर्दधे देवः सुराः स्वस्थानमागताः ॥ २६ ॥
तस्मात् स सर्वदेवेशः शङ्खचक्रगदाधरः ।
स्वनाम्ना कीर्त्यमानेन लोकानां शमलं हरन् ॥ २७ ॥

भस्मीकुर्वंश्च पापानि प्रयच्छन्नमृतं नृणाम् ।
दयालुः पावनो मान्यः सर्वसद्गुणसम्भृतः ॥ २८ ॥
श्रीमान् रामाख्यया देवस्त्रेतायां स भविष्यति ।
कौसल्यायां कोसलेषु नृपाद् दशरथादजः ॥ २९ ॥
अव्ययात्मापि सञ्जातः स्वेच्छया स वनं गतः ।
सीतया लक्ष्मणेनापि सहितो दण्डके वसन् ॥ ३० ॥
रावणेन हतां सीतां जटायोः शुश्रुवान् हरिः ।
सुग्रीवं चापि संगृह्य हत्वा वालिनमूर्जितम् ॥ ३१ ॥
ततो हनुमता दृष्टां सीतां श्रुत्वा विभीषणम् ।
संगृह्य सेतुना लङ्कां गत्वा हत्वा च रावणम् ॥ ३२ ॥
पुष्पकेण विमानेन यदायोध्यां समाव्रजेत् ।
तदाहमभिषेक्ष्यामि महाचमसगैर्जलैः ॥ ३३ ॥
असीवरुणगङ्गाद्यैः शतक्रतुषु सम्भृतैः ।
या चैषा चमसा भूयान्महती प्रीतिकृद् विभोः ॥ ३४ ॥
ततो भुवं समागत्य यक्ष्येऽस्य प्रीतिहेतवे ।
तदा मे देवयजनं कुत्र स्याद् भूतले शुभम् ॥ ३५ ॥
इति चिन्तयतस्तस्य ब्रह्मणो नारदोऽभ्यगात् ।
गृणन् वैकुण्ठनामानि मूर्छयन् महतीं पुरः ॥ ३६ ॥

ब्रह्माणं पितरं नत्वा तेन सम्भावितो मुदा ।
सप्रश्रयं वैजयन्त्यां तेनादिष्टः सुसंस्थितः ॥ ३७ ॥
तमाह पद्मभूर्ब्रह्मा तनयं नारदं प्रियम् ।
स्वस्ति ते नारद मुने न चैकत्र स्थितिस्तव ॥ ३८ ॥
लोकानां चैव साधूनां देवतानां हिताय वै ।
आहेतायासुराणां च साधु देवद्विषामपि ॥ ३९ ॥
चरणे ते भवेदर्चा सैव विष्णोर्महात्मनः ।
ततो महाभागवतो भवानस्ति सुतो मम ॥ ४० ॥
अहमप्यद्य धन्योऽस्मि यद् भागवतनन्दनः ।
कस्माल्लोकादिमं लोकमागतोऽसि चरन् सुत ॥ ४१ ॥
मां दिदृक्षुश्चिरादद्य तद् वदस्व ममाङ्गज ।
इति पद्मभुवा पृष्टो नारदः प्राह सन्नतः ॥ ४२ ॥
सर्वज्ञ भगवन् ब्रह्मंस्तात मे भक्तवत्सल ।
स्रष्टा त्वं सर्वलोकानां पाता दाता पितामह ॥ ४३ ॥
सनकादिमरीच्याद्या बहवस्ते सुताः प्रभो ।
शारीरा मानसास्तेषां को वेद गणनां पितः ॥ ४४ ॥
तेषु सत्स्वपि ते प्रीतिरतुला मयि विद्यते ।
ततोऽहं प्रीतिपात्रं ते कृतकृत्योऽस्मि साम्प्रतम् ॥ ४५ ॥

भगवद्भक्तिभरितो महाभागवताग्रणीः ।
भवान् ननु सुतोऽहं ते शिष्यस्ते शासनानुगः ॥ ४६ ॥
पुरा निषेव्य भक्त्या त्वां द्रष्टुकामो भुवं गतः ।
तात तस्मिन् महापुण्ये खण्डे तत्रापि सिद्धिदे ॥ ४७ ॥
बहूनि पुण्यतीर्थानि क्षेत्राणि विविधानि च ।
हरेर्नानावतारैश्च संश्रितानि महान्त्यपि ॥ ४८ ॥
दिव्यान्यपि च सिद्धानि सद्यःसिद्धिप्रदानि च ।
आश्रमाणि महर्षीणां धारणासक्तचेतसाम् ॥ ४९ ॥
समग्रं ध्यायतां विष्णुं देवदेवं जनार्दनम् ।
खण्डं तं नवसाहस्रयोजनायतमुत्तमम् ॥ ५० ॥
पर्यटन् सर्वमालोक्य त्वद्दर्शनसमुत्सुकः ।
ततोऽहमागतस्तात किमस्त्यविदितं तव ॥ ५१ ॥
इत्युक्तस्तेन लोकेशः परमेष्ठी पितामहः ।
तमाह नारदं भूयः स्मृत्वा स्वाभीप्सितं मुदा ॥ ५२ ॥
त्वया नारद सर्वाणि क्षेत्राण्यायतनानि च ।
आश्रमाणि च पुण्यानि शीघ्रसिद्धिप्रदानि च ॥ ५३ ॥
सम्यग् विलोकितान्यद्य भूमौ पर्यटता किल ।
मां भ्रामितो गत्वा कर्मभमौ विशेषतः ॥ ५४ ॥

भारतं वर्षमासाद्य यजेयं हरिमीश्वरम् ।
शतं क्रतूनां बहुभिर्हविर्भिर्विविधैश्चिरम् ॥ ५५ ॥
तत्र मे देवयजनं कुत्र स्यात् पुण्यभूतले ।
मत्सृष्टेषु न पश्यामि नाहं यद् व्यापृतस्तथा ॥ ५६ ॥
सृष्टिकर्माणि तद् ब्रूहि भुवि पुण्यतमं स्थलम् ।
त्वया संस्मारितोऽहं च तत्र गत्वा द्रुतं हरिम् ॥ ५७ ॥
यक्ष्ये यज्ञपतिं यज्ञं यज्ञभोक्तारमीश्वरम् ।
इत्युक्तो नारदः प्राह ब्रह्माणं पितरं तदा ॥ ५८ ॥
सर्वज्ञस्यापि ते ब्रह्मन् किं स्यादविदितं विधे ।
मदनुग्रहाय भगवन्नेवमाह भवान् ननु ॥ ५९ ॥
आश्रित्य महतां छन्दं वर्तेत तदिहाप्नुवन् ।
पुरुषस्तस्य सा प्रीतिर्महतां स्वस्तिदा सदा ॥ ६० ॥
अस्ति तात महापुण्यं दक्षिणाम्बुनिधेस्तटे ।
क्षेत्राणामुत्तमं क्षेत्रं सर्वसिद्धिप्रदं भुवि ॥ ६१ ॥
कण्वाश्रमसमीपे तु महाश्वत्थाभिशोभिते ।
देशे पुण्यतमे तस्मिन् चक्रतीर्थविराजिते ॥ ६२ ॥
वल्कलाख्ये महापुण्ये क्षेत्रे सर्वसुरार्चिते ।
अत्र ते देवयजनं भवेत् पुण्यतमं नृणाम् ॥ ६३ ॥

दर्शनात् स्पर्शनादत्र सद्यो मुक्तिप्रदं हि तत् ।
तादृशं नैव पश्यामि भुवि पुण्यतमं स्थलम् ॥ ६४ ॥
मदुक्तमवधार्य त्वं यथेच्छसि तथा कुरु ।
इत्युक्त्वा विरामाथ नारदो ब्रह्मनन्दनः ॥ ६५ ॥
ब्रह्मा तदुपधार्याथ भूरिसन्तोषसम्भृतः ।
भुवि गन्तुं मनश्चक्रे वल्कलक्षेत्रमुत्तमम् ॥ ६६ ॥

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये

चतुर्थोऽध्यायः ।

अथ पञ्चमोऽध्यायः ।

ततश्चतुर्मुखो ब्रह्मा हंसमारुह्य सत्वरम् ।
भुवं समागमद् यत्र वल्कलाख्यं महत् स्थलम् ॥ १ ॥
तदा सुरगणाः सर्वे मरीच्याद्याश्च तत्सुताः ।
नारदस्तुम्बुरुश्चैव पर्वतः सनकादयः ॥ २ ॥
गन्धर्वाप्सरसो नागाः सिद्धा विद्याधरास्तथा ।
सर्वे समागताः क्षेत्रं वल्कलाख्यं भुवःस्थले ॥ ३ ॥

वसिष्ठो वामदेवोऽत्रिः कण्वः कात्यायनस्तथा ।
एकतश्च द्वितो व्यासो मैत्रेयः कवषोऽसितः ॥ ४ ॥
अगस्त्यो गौतमो गर्गः पैलो रैक्वः पराशरः ।
संवर्तश्च भरद्वाजो विश्वामित्रः शतर्चनः ॥ ५ ॥
मार्कण्डेयश्च माण्डव्यः पैङ्गो गृत्समदः कविः ।
सुमन्तुर्जैमिनिश्चैव आपस्तम्बाश्वलायनौ ॥ ६ ॥
वैशम्पायन आयास्यदुद्गाता सामपारगः ।
बृहस्पतिश्चाङ्गिरसो भार्गवश्च्यवनो मुनिः ॥ ७ ॥
रामोऽपि जामदग्न्यश्च ऋषयोऽत्र समागताः ।
सर्वे तत्र नरा नार्यो याः सृष्टा ब्रह्मणा प्रजाः ॥ ८ ॥
शीघ्रं समागमंस्तत्र यज्ञसन्दर्शनोत्सुकाः ।
यज्ञार्थं सर्वसम्भाराः सम्भृता ब्रह्मणो मुने ॥ ९ ॥
भूतैरेवात्र तत्सृष्टैरहम्पूर्वतया तदा ।
भूमिं तद्वेवयजने निर्माय विधिवत् पुनः ॥ १० ॥
व्रीहिगोधूमचणकमुद्गमाषतिलाढकान् ।
मरीचिसर्षपादींश्च घृततैलगुडोत्करान् ॥ ११ ॥
पूगीफलानि ताम्बूलदलराशींश्च तत्र वै ।
नानाविधानि वस्त्राणि महाराशीकृतानि च ॥ १२ ॥

विदधत्यत्र तरवो यज्ञोपकरणानि च ।
यूपस्रुक्स्रुवशस्त्राणि चमसोलूखलानि च ॥ १३ ॥
इडामुसलमुख्यानि निर्ममुस्तत्र ते द्रुतम् ।
चिन्तामणिं च सुरभिं कल्पद्रुमथानयत् ॥ १४ ॥
अभीप्सितार्थदं तत्र सर्वेषां वलवृत्रहा ।
निधीनत्रानयामास दानार्थं यज्ञवृद्धये ॥ १५ ॥
सुमुहूर्ते शुभे लग्ने दीक्षयाञ्चक्रिरे द्विजाः ।
पितामहं महात्मानो द्वैपायनमुखास्तथा ॥ १६ ॥
पैलो होता द्वितोऽध्वर्युरापस्तम्बोऽत्र सामगः ।
उद्गाता जैमिनिस्तत्र सुमन्तुरभवत् कविः ॥ १७ ॥
आग्नीध्रोऽथर्वणः प्राज्ञो व्यासो ब्रह्माभवत् स्वयम् ।
ततः प्रववृते यज्ञो ब्रह्मणः परमेष्ठिनः ॥ १८ ॥
धिष्ण्येषु चाग्नयस्तत्र जज्वलुर्मथिता द्विजैः ।
प्रवर्ग्यमग्रतः कृत्वा इष्टीरपि यथाविधि ॥ १९ ॥
परिषिक्ताग्नयस्तत्र समन्ताच्च परिस्तृताः ।
अग्नेरुत्तरवेद्यां तु पात्राण्यासादितानि तैः ॥ २० ॥
प्रोक्षणीः स्रुक्स्रुवे चेडापात्रमाद्ये प्रयच्छति ।
मुसलोलूखले शस्त्रं महाचमसमेव च ॥ २१ ॥

प्रतिष्ठाप्य यथाशास्त्रं पशून् मेध्यान् बहूनथ ।
हिरण्मयेषु यूपेषु संयतान् विशसन्ति च ॥ २२ ॥
पुण्यगन्धा वपाश्चापि घृतधारापरिप्लुताः ।
हवींष्यन्नानि साज्यानि सुधानि च निरन्तरम् ॥ २३ ॥
निरन्तराज्यधारा निर्हूयन्तोऽध्वर्युपूर्वकैः ।
ऋत्विग्भिरपरैश्चापि सोमपानसमन्वितैः ॥ २४ ॥
हुतानि तानि सम्भर्तुमशक्तो हव्यवाट् तदा ।
अतिभारमिमं भर्तुं नालमस्म्यहमित्यपि ॥ २५ ॥
क्रोशन्निव महाज्वालास्वानेन ज्वलनोऽज्वलत् ।
नीतेषु तेषु तत्रासन् बहवो ह्यन्नराशयः ॥ २६ ॥
सूपव्यञ्जनभक्ष्याणां राशयः पर्वतोपमाः ।
नद्यश्च दधिमध्वाज्यवाहिन्योऽत्र निरन्तरम् ॥ २७ ॥
रसायनानि दिव्यानि ह्रदाः पायसपूरिताः ।
भुञ्जन्तस्तुतुषुः सर्वे दिव्यस्रग्वस्त्रभूषणाः ॥ २८ ॥
अमाद्यंस्ते सुराः सोमैस्तर्पिता वसुभिर्द्विजाः ।
नापेक्षन्ते क्वचित् किञ्चित् सर्वमन्त्रार्थपूरिताः ॥ २९ ॥
तां स्वयज्ञसमृद्धिं स दृष्ट्वा लोकपितामहः ।
स्मयमानोऽतिहर्षेण ह्येवं समचिन्तयत् ॥ ३० ॥

अग्निदैवाश्च ऋषयो द्विजाः सर्वे जनास्तथा ।
सन्तृप्ताः पूर्णकामाश्च नैव वाञ्छन्ति किञ्चन ॥ ३१ ॥
अक्षया राशयो ह्यत्र त्वन्नादीनां प्रकल्पिताः ।
सन्त्येतान् को नु भुञ्जीयान्न पश्याम्यत्र तादृशम् ॥
नैतादृशः क्रतुर्वा स्याद्धन्त कालत्रयेऽपि च ।
इति स्मयाच्चिन्तयतो लोककर्तुर्विधेस्तदा ॥ ३३ ॥
नुदन्नस्य स्मयावेशं सन्तुष्टो ब्रह्मणो हरिः ।
क्रतुं च सफलीकुर्वन् प्रादुरास जनार्दनः ॥ ३४ ॥
क्षुत्क्षामशुष्ककण्ठोष्ठवृद्धब्राह्मणरूपधृक् ।
ततः समागतं ब्रह्मा ददर्श परमाद्भुतम् ॥ ३५ ॥
सुदर्शनीयावयवं दीप्यन्तं ब्रह्मतेजसा ।
क्षुधार्दितं परिश्रान्तं शुष्ककण्ठोष्ठतालुकम् ॥ ३६ ॥
जलं चान्नमपेक्षन्तमत्यन्तत्वरयान्वितम् ।
दृष्ट्वा तं विस्मितो ब्रह्मा कोऽयमत्रेदृशो जनः ॥ ३७ ॥
नातृप्तोऽयमिहान्नार्थी नैवास्ति क्वचिदप्यहो ।
नरो दीनोऽयमन्नार्थी कियदूरादिहागतः ॥ ३८ ॥
सन्तर्पयाम्यहं चैनमन्नैर्बहुरसान्वितैः ।
सर्वोत्कृष्टं करिष्यामि वसुवस्त्रविभूषणैः ॥ ३९ ॥

सर्वदान्नपतिं चैनं कुर्या नानाभिलाषिणम् ।
इत्युत्साहयुतं देवं ब्रह्माणं लोकनायकम् ॥ ४० ॥
समीपमुपसृत्याह बुभुक्षुर्ब्राह्मणश्चरन् ।
श्रुत्वा यज्ञसमृद्धिं ते बहुदूरादिहागतः ॥ ४१ ॥
क्षुत्क्षामो भोक्तुकामोऽहं तृप्तिं नाप्तश्च कुत्रचित् ।
ज्ञात्वा बह्वन्नदं त्वां च सर्वलोकमहेश्वरम् ॥ ४२ ॥
देहि मेऽन्नं द्रुतं ब्रह्मन् क्रतुकालेऽन्नमिच्छते ।
मा विलम्बोऽत्र कर्तव्यः क्षुच्छ्रान्तो नितरामहम् ॥
अन्नमेव हि सर्वेषां जीवनं बलपुष्टिदम् ।
अन्नं साक्षाद्धरिः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः ॥ ४४ ॥
सर्वदोऽन्नप्रदः सत्यं स माता स पितापि च ।
देहि मेऽन्नं द्रुतं ब्रह्मन् प्राणान् रक्ष ममाधुना ॥ ४५ ॥
पश्योदरं मम ब्रह्मन् मुखं शुष्कोष्ठतालुकम् ।
दर्शयित्वा पुनः प्राह देहि देह्यन्नमजज ॥ ४६ ॥
इत्युक्त्वा तान्तवदनस्तूष्णीमास्तेऽग्रतो विधेः ।
ब्रह्मा तद्वचनं श्रुत्वा कृपया खिन्नमानसः ॥ ४७ ॥
पाकाध्यक्षं समाहूय विस्मितः कमलासनः ।
भोजयैनं द्विजश्रेष्ठं मृष्टान्नैः षड्रसैरपि ॥ ४८ ॥

यथा तृप्तो भवेँद् विप्रस्तथा कुर्वविलम्बितम् ।
इत्युक्तस्तं द्विजं श्रान्तं गृहीत्वा त्वरयान्वितः ॥ ४९ ॥
विवेश पाकस्थानं तद् यत्र सन्त्यन्नपर्वताः ।
तत्र गत्वा स तं प्राह त्वमत्रोपविश द्रुतम् ॥ ५० ॥
भुङ्क्ष्व चान्नं यथाकामं द्विज पश्यान्नसञ्चयान् ।
कीदृक् तेऽन्नमिहेष्टं स्यात् कियदस्मिन्न चेप्सितम् ॥
भुङ्क्ष्वाशु नात्र सङ्कोचस्तव ब्राह्मणपुङ्गव ।
इत्युक्तस्तेन विप्रोऽसौ तमाहाथाद्भुतो द्विजः ॥ ५२ ॥
एको विष्णुर्महद् भूतं सर्वात्मा लोकनायकः ।
तत्प्राणाहुतिपर्यन्तमन्नं पश्यामि नात्र वै ॥ ५३ ॥
कथं भवेच्च मे तृप्तिर्देह्यस्यापाशनं मम ।
इति हस्तं प्रसार्यास्ते विप्रात्मा स जनार्दनः ॥ ५४ ॥
तच्छ्रुत्वा वचन तस्य दृष्ट्वा चोद्योगमस्य च ।
तत्स्वीकृतान्नराशिं च ससूपव्यञ्जनादिकम् ॥ ५५ ॥
पयोदधिघृतक्षौद्रसरितोऽपि बहुस्रवाः ।
तिरोभूतान् क्षणेनैव ह्यपक्वांस्तण्डुलादिकान् ॥ ५६ ॥
पाकाध्यक्षो ह्यदृष्ट्वैतान् क्वापि किञ्चिदपि क्वचित् ।
अन्नं मे देहि देहीति क्रोशन्तं ब्राह्मणोत्तमम् ॥ ५७ ॥

महाक्रतौ लोकनाथनिर्मिते सर्वतृप्तिदे ।
नास्त्यन्नं तृप्तिदं मेऽद्य क्षुच्च मे बलवत्यहो ॥ ५८ ॥
अन्नमापोशनं मह्यं देहि देहीति वादिनम् ।
द्विजं दृष्ट्वाद्भुतं सोऽपि विस्मितो भयकातरः ॥ ५९ ॥
पाकाध्यक्षो विधिं प्राप्य प्रणिपत्याह सत्वरम् ।
शृणुष्वात्यद्भुतं देव लोकनाथ पितामह ॥ ६० ॥
बुभुक्षोर्ब्राह्मणस्यास्य चरित्रं विस्मयप्रदम् ।
भुङ्क्ष्वोपविश्येत्युक्तोऽयं मया स ब्राह्मणः प्रभो ॥ ६१ ॥
न प्राणाहुतिपर्याप्तो ह्यसावन्नसमुच्चयः ।
अनेन मे कथं तृप्तिरिति हस्तं प्रसार्य सः ॥ ६२ ॥
आपोशनं मे देहीति वदन् सामन्नपर्वतात् ।
पक्वानन्यानपक्वांश्च स्वीकृत्येक्षणमात्रतः ॥ ६३ ॥
देहि मेऽन्नं क्षुधार्ताय त्वरयेत्याह स द्विजः ।
न किञ्चिदत्र पश्यामि दातुं तत्क्षुन्निवृत्तये ॥ ६४ ॥
चरितं चास्य विप्रस्य न दृष्टं क्वापि न श्रुतम् ।
पश्यैनमभिजानीहि ब्रह्मन्नित्युदितो विधिः ॥ ६५ ॥
अत्यद्भुतमिदं किन्नु न विप्रोऽयं समागतः ।
स एवायं मम पिता देवदेवो जनार्दनः ॥ ६६ ॥

स्मयावेशं मम नुदन् केवलं दययैव मे ।
अनुग्रहायाविरासीत् ऋतोश्चास्य समृद्धिदः ॥ ६७ ॥
तं विलोक्य कृतार्थोऽहं भूयासमिति चिन्तयन् ।
द्रुतं तमभिसङ्गम्य प्रणिपत्य कृताञ्जलिः ॥ ६८ ॥
तुष्टाव यज्ञभोक्तारं देवदेवं पितामहः ।
ॐ नमो देवदेवाय वेदवेद्याय ते नमः ॥ ६९ ॥
अणोरणिम्ने देवाय महतां च महीयसे ।
सर्वान्तर्यामिणे तुभ्यं विश्वरूपाय ते नमः ॥ ७० ॥
सर्वकर्त्रे सर्वभोक्त्रे सर्वपालाय ते नमः ।
नमो हिरण्यगर्भाय शिपिविष्टाय ते नमः ॥ ७१ ॥
ससर्ज पद्मनाभो मामादौ तं पितरं गुरुम् ।
नावेदयं भयोद्विग्नः स एवाह तपेति माम् ॥ ७२ ॥
ध्यायतश्च चिरान्मे स हंसः शुचिषदव्ययः ।
प्रादुर्भूतः स दयया हेमाङ्गः प्रभया ज्वलन् ॥ ७३ ॥
तं दृष्ट्वाहं पुरा भीतः कस्त्वमित्यवदं गिरा ।
स च मां कस्त्वमित्याह नोत्तरं वेद्म्यहं भयात् ॥ ७४ ।
ततोऽहं हरिरित्याह भगवान् कृपया हरे ।
तत्स्वरूपं विवित्सुं मामोमित्युक्त्वा तिरोदधे ॥ ७५ ॥

स्रष्टुमिच्छोर्ममाप्याह भूर्भुवःस्वरिति प्रभो ।
गायत्र्या सह वेदान् मे त्वमेवादौ समादिशः ॥ ७६ ॥
ततः कोऽहमदस्स्रष्टा त्वयैव विहितो हरे ।
यज्ञाङ्ग तव सुप्रीत्यै यजेयं वैदिकैर्मखैः ॥ ७७ ॥
यज्ञभोक्ता त्वमेवेश यज्ञानां फलदायकः ।
त्वमेव सृष्टिस्त्वं देव यजमानो हवींषि च ॥ ७८ ॥
यज्ञच्छिद्राणि सर्वाणि त्वन्नामस्मृतिमात्रतः ।
पुण्यान्येव भवन्तीश स त्वं साक्षाद्धरिर्ननु ॥ ७९ ॥
अनुगृह्णीष्व मां देव श्रीनिवास जनार्दन !
इति स्तुवन्तं तं प्राह विप्रस्तान्तमुखाम्बुजः ॥ ८० ॥
स्तुत्यानया तव ब्रह्मन् न पूर्णमुदरं मम ।
न मे प्रशान्ता क्षुदपि क्षुच्छान्तस्य क्व मे रुचिः ॥ ८१ ॥
भूषणानि च वासांसि क्षुच्छान्तं प्रीणयन्ति न ।
सुतृप्तं कुरु मां क्षिप्रं ततः स्तुहि यथारुचि ॥ ८२ ॥
वदन्तं तमिति ज्ञात्वा निजानुग्रहणोन्मुखम् ।
ब्रह्मा सविनयं भक्त्या प्राह ब्राह्मणरूपिणम् ॥ ८३ ॥
नित्यतृप्तस्य तेऽन्नस्य सर्वान्नाधिपतेः प्रभो ।
पूर्णकामस्य सर्वत्र सर्वदानन्दरूपिणः ॥ ८४ ॥

हरिश्मश्रोरनन्तस्य स्वयं क्षुत्क्षामकस्य च ।
केनोपायेन तृप्तिं ते कुर्वेऽहं त्वत्सुतः पितः ॥ ८५ ॥
मम तृप्तिस्त्वया कार्या ननु पुत्रेष्टदः पिता ।
नाहं जानाम्युपायं ते नित्यतृप्तस्य तृप्तिदम् ॥ ८६ ॥
त्वमेवादिश मे देव तत् कुर्वेऽहं त्वदीरितम् ।
इत्युक्तः प्राह देवेशस्तुष्टः कमलसम्भवम् ॥ ८७ ॥
प्रीतोऽस्मि तव देवेश भक्त्या क्रतुभिरेव च ।
तव स्मयापनोदार्थमेवमाचरितं मया ॥ ८८ ॥
मद्भक्तप्रवरो हि त्वं सर्वदेवगणेष्वपि ।
सर्वकर्माण्यपि सदा कुर्वाणो मत्पदाश्रयः ॥ ८९ ॥
मय्यर्पितमनोबुद्धिः सर्वदारित यतो भवान् ।
ततो ममात्र तृप्त्यर्थमुपायं ते वदाम्यहम् ॥ ९० ॥
त्वया सृष्टैर्जनैः सर्वैः क्रियमाणानि यानि वै ।
हव्यकव्यानि कर्माणि तर्पयन्तु करे मम ॥ ९१ ॥
ततोऽहमस्मि सन्तृप्तः सकला अर्पिताः क्रियाः ।
समादिशैवं लोकेषु किमभीष्टं ददामि ते ॥ ९२ ॥
इत्युक्तस्तेन विप्रेण ब्रह्मा सन्तुष्टमानसः ।
वरं स वव्रे देवेशः स्वमखक्षेत्रवृद्धये ॥ ९३ ॥

यदि तुष्टोऽसि मे देव देवदेव जनार्दन ।
यत् त्वं दर्शनमात्रेण जनानां जनिमर्दसे ॥ ९४ ॥
जनार्दनेति नाम्नात्र प्रथमेऽत्र मखस्थले ।
अनेनैवात्र रूपेण यावत् कल्पान्तमावस ॥ ९५ ॥
वल्कलाख्यमिदं क्षेत्रमद्यप्रभृति तात ते ।
नाम्ना जनार्दनक्षेत्रमित्यस्तु प्रथितं भुवि ॥ ९६ ॥
इत्युक्तो ब्रह्मणा देवो मन्दहासमुखो मुदा ।
ओमित्युक्त्वा स धातारं यज्ञशेषं कुरु द्रुतम् ॥ ९७ ॥
इत्युक्त्वा स महादेवो देवदेवो जनार्दनः ।
तत्रैवास्ते यज्ञभूमौ विप्ररूपी जनार्दनः ॥ ९८ ॥
यः पश्यति कदापीशं क्षेत्रं गत्वा जनार्दनम् ।
सर्वजन्माघनिर्मुक्तो मुक्तिमेति न संशयः ॥ ९९ ॥
पितॄनुद्दिश्य यः श्राद्धं क्षेत्रे कुर्याज्जनार्दने ।
जनार्दनार्पणं कुर्वन् मुक्ताः स्युः पितरोऽत्र वै ॥ १०० ॥
यत्र तत्र स्थितो वापि स्मरन् देवं जनार्दनम् ।
पितॄनुद्दिश्य यः श्राद्धं करोति श्रद्धयान्वितः ॥ १०१ ॥
जनार्दने कृतं तेन भवेदेव न संशयः ।
तदर्पणं विना यत्तु तथा तत्स्मरणं विना ॥ १०२ ॥

कृतं श्राद्धं तु विफलं तथैव स्यान्न संशयः ।
तस्मात् समर्पयेत् तस्मै हव्यकव्यानि देहिभिः ॥१०३॥
यो वसेद् घटिकामात्रं पुण्यक्षेत्रे जनार्दने ।
स ऋणत्रयनिर्मुक्तो न पुनर्जायते भुवि ॥१०४॥

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये

पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः

अथ पद्मोद्भवो देवमुपलक्ष्य जनार्दनम् ।
ततोऽभीष्टवरं लब्ध्वा पूर्णसर्वमनोरथः ॥ १ ॥
तृतीयसवनाद्याश्च शिष्टा या याः क्रियाः शुभाः ।
ताः स चक्रे यथाशास्त्रं प्रीणयंस्तं जनार्दनम् ॥ २ ॥
तत्रर्त्विजो महाभागा वेदा मूर्तिधरा यथा ।
और्वरं च महात्मानो व्यासाद्याः समकल्पयन् ॥ ३ ॥
बृहतीभिः सहस्राभिर्होतारो ऋग्भिरच्युतम् ।
शंसन्तोऽतिप्रियाभिस्तं देवदेवं जनार्दनम् ॥ ४ ॥

बृहद्रथन्तरमुखैः सामभिः साम्नसंस्तुतम् ।
स्तुवन्तः सामनामानं सामप्रीतं जनार्दनम् ॥ ५ ॥
अध्वर्यवो यजन्ति स्म निगमेन हविर्गणैः ।
वैश्वदेवैः शास्त्रसङ्घैरथर्वणशिरोमुखैः ॥ ६ ॥
आग्नीध्रा निरसन्तोऽत्र द्विषतः पाप्मनोऽसुरान् ।
इत्थं मखं ते तन्वन्तो ब्रह्मणः परमेष्ठिनः ॥ ७ ॥
विष्णुक्रमानातिक्रम्य निर्वृत्यासौत्यपूर्वकान् ।
निर्वृत्यौपवसथ्यं ते सोमं च सवनत्रये ॥ ८ ॥
महाचमसगैस्तीर्थैः सर्वतीर्थमयैः शुभैः ।
वरुणा चासी च गङ्गा यत्र सन्निहितास्तदा ॥ ९ ॥
सद्रोणकलशं पूर्णं महाचमसमेव च ।
यजमानमुपस्पृश्य यजनेऽभिषिषेचिरे ॥ १० ॥
तदा सस्मार लोकेशो ब्रह्मा स्वाभीप्सितं चिरात् ।
तीर्थैस्तै रामदेवस्य परमेष्ठ्यभिषेचनम् ॥ ११ ॥
अर्हं स्याल्लोकनाथस्येत्यवसीय मुदा विधिः ।
स्वेन सुप्रार्थितं राममवतीर्य भुवः स्थले ॥ १२ ॥
दध्यावजायमानं तं जातं दशरथान्वये ।
कौसल्यायां चक्रशङ्खशयनैः सह राघवः ॥ १३ ॥

मानुषानुकृतिर्दैवः कौशिकक्रतुरक्षकः ।
हत्वा सुबाहुं मारीचं निरस्य मिथिलां गतः ॥ १४ ॥
अयोनिजां रमां सीतामुद्वहन् स्वपुरं गतः ।
स साम्राज्याभिषेकाय नियुक्तो गुरुणा यदा ॥ १५ ॥
कैकेय्या मन्थरावाक्यभिन्नया चोदितो मुदा ।
सत्यसन्धं स्वतातं तं कुर्वन्नेव महायशाः ॥ १६ ॥
रक्षोवधार्थं देवानां परितोषाय चेश्वरः ।
प्रविश्य दण्डकारण्यं रामो राजीवलोचनः ॥ १७ ॥
खरादीन् राक्षसान् हत्वा विश्वरूपो महाभुजः ।
मारीचं मायिनं मुक्तं निहत्य मृगरूपिणम् ॥ १८ ॥
श्रुत्वा गृध्रस्य वचनाद् रावणेन हृतां प्रियाम् ।
सुग्रीवहनुमद्भ्यां च सङ्गतः कपिसैन्यकैः ॥ १९ ॥
पूर्वाम्बुधिमनुप्राप्य तत्र देवो विभीषणम् ।
लङ्काधिपत्येऽभिषिच्य सेतुं बद्ध्वाम्बुधौ ततः ॥ २० ॥
गत्वा लङ्कां महाबाहुर्हत्वा रावणमाहवे ।
लोकं पालयितुं रामः प्रस्थितः सीतया सह ॥ २१ ॥
तमिहानीय देवेशं सर्वलोकेश्वरं प्रभुम् ।
रामं दाशरथिं वीरं न्याय्यमेभिर्जलैः शुभैः ॥ २२ ॥

सर्वतीर्थमयैः पुण्यैर्महाचमससम्भृतैः ।
अभिषेक्तुं महादेवः सोऽर्होऽस्य तु न चापरे ॥ २३ ॥
यदैनमभिषेक्ष्यामि कृतकृत्योऽस्म्यहं तदा ।
इति ज्ञात्वा तदा वेधा भृगुणा ऋषिणा भुवि ॥२४॥
गच्छत्ययोध्यां भगवान् रामः परपुरञ्जयः ।
देवकार्याणि निर्वृत्य जगद्रक्षणतत्परः ॥ २५ ॥
तमत्रैवाभिषेक्ष्यामि महाचमसगैर्जलैः ।
असी च वरुणा गङ्गा चक्ररूपात्र संस्थिता ॥ २६ ॥
षट्षष्टिकोटितीर्थानि सन्ति तामिः सहात्र वै ।
एभिः शुभैस्तीर्थजलैराभिषेकाय सोऽर्हति ॥ २७ ॥
तस्मात् तमभिसङ्गम्य रामं राजीवलोचनम् ।
पितरं मे महाबाहुं पद्मनाभं पुरातनम् ॥ २८ ॥
मम विज्ञापनं तस्य श्रावयित्वा यथोदितम् ।
प्रह्वो बद्धाञ्जलिस्त्वं तं द्रुतमानय सुव्रत ॥ २९ ॥
यदा तमभिषेक्ष्यामि कृतकृत्योऽस्म्यहं तदा ।
गच्छ शीघ्रं विलम्बोऽत्र नैव स्याच्छुभकर्मणि ॥३०॥
इत्युक्तः स ऋषिस्तूर्णं गत्वा च तमलोकत ।
पुष्पके राममासीनं सीतया सह शुद्धया ॥ ३१ ॥

लक्ष्मणेनातिभक्तेन सुमित्रातनयेन च ।
स्वातिप्रियानुजेनापि कोदण्डेषुधिधारिणा ॥ ३२ ॥
विभीषणेनाङ्गदेन सुग्रीवेण हनूमता ।
वानरैर्वानरस्त्रीभिः सेवितं राक्षसैरपि ॥ ३३ ॥
तं दृष्ट्वा तुष्टवदनः प्रह्वो बद्धाञ्जलिर्मुनिः ।
रामं विज्ञापयामास स्रष्टुर्विज्ञापनं तदा ॥ ३४ ॥
राम दाशरथे देव नारायण परात् पर ।
सर्वेश्वराप्रमेयात्मन् रावणान्तक सुव्रत ॥ ३५ ॥
सीतेयं सा महालक्ष्मीः सर्वदा सङ्गता त्वया ।
त्वं हि नारायणो देवः पुण्डरीकनिभेक्षणः ॥ ३६ ॥
त्वत्सेवार्थमिहायाता देवा वानररूपिणः ।
त्वां निरीक्ष्य महाभाग कृतकृत्याश्च तेऽभवन् ॥ ३७ ॥
ये त्वां पश्यन्ति देवेशं ये नामानि गृणन्ति ते ।
दग्धपापाश्चामृतत्वं प्राप्नुवन्ति न चान्यथा ॥ ३८ ॥
तव सन्दर्शनादद्य कृतार्थोऽहं शुभानन ।
त्वन्नाभिपद्मसम्भूतो ब्रह्मा लोकपितामहः ॥ ३९ ॥
पुत्रस्तत्कोपसम्भूतो रुद्रस्त्वत्पौत्र एव हि ।
इन्द्रादयः सुरगणास्त्वन्नियुक्ताः समासते ॥ ४० ॥

परिचर्यापराः स्वामिन् सदा ते परिचारकाः ।
देवाश्च सर्वे त्वामेव वेदयन्ति निरन्तरम् ॥ ४१ ॥
स्रष्टा पाता तथा हर्ता त्वमेवास्य जगन्मय ।
त्वां विज्ञापयते पुत्रस्तवैव मधुसूदन ॥ ४२ ॥
प्रतियान्तं स्वनगरमयोध्यां राजसत्तम ।
राज्ञां च सूर्यवंश्यानां राजधानीं पितुश्च ते ॥ ४३ ॥
लोकान् कर्तुं सनाथांश्च जगद्रक्षणतत्परः ।
वल्कलाख्ये महापुण्ये दक्षिणाम्बुनिधेस्तटे ॥ ४४ ॥
त्वामिष्ट्वा परमेष्ठी स सर्वतीर्थमयैर्जलैः ।
सम्भृते वारुणे पात्रे वरुणास्यादिभिर्युते ॥ ४५ ॥
परमेष्ठ्यभिषेक्तुं त्वां महोत्साहसमन्वितः ।
प्रेषयामास मामद्य देवेश तव सन्निधिम् ॥ ४६ ॥
तस्मात् त्वं पुत्रवात्सल्यात् समायाहि महाभुज ।
तत्रैव चाभिषिक्तस्त्वमयोध्यां गच्छ मा चिरम् ॥४७॥
दयालुस्त्वमसि स्वामिन् दयनीयश्च ते सुतः ।
आज्ञापय महाभाग विमानं पुष्पकं द्रुतम् ॥ ४८ ॥
वल्कलाभिमुखं राम यतः पूर्णमनोरथः ।
सुतस्ते भविता स्वामिन् यथेच्छं ते प्रवर्तताम् ॥ ४९ ॥

एतावदुक्त्वा स ऋषिर्भृगुर्ब्रह्मसमुद्भवः ।
श्रीरामदर्शनप्रीतस्तस्थौ तत्सन्निधौ तदा ॥ ५० ॥
रामस्तद्वचनं श्रुत्वा भृगोस्तस्य महात्मनः ।
प्रोवाच तं ब्रह्मसुतं मुनिं सर्वविदां वरम् ॥ ५१ ॥
मुने दशरथस्यासंश्चत्वारस्तनयाः शुभाः ।
तिस्रः सुमित्रा कौसल्या कैकेयी च स्त्रियोऽस्य हि ॥
कौसल्यासूत मां तत्र भरतः कैकयीसुतः ।
लक्ष्मणं चैव शत्रुघ्नं सुमित्रासूत नन्दनौ ॥ ५३ ॥
यौवराज्याभिषेकाय यदैच्छत् स पिता मम ।
वरदानबलाद् राज्यं कैकेयी भरतेऽर्पयत् ॥ ५४ ॥
धावयामास मां चापि दण्डकान् प्रति तत्क्षणात् ।
अहमाविश्य विपिनं चित्रकूटाश्रमे स्थितः ॥ ५५ ॥
मद्वियुक्तोऽथ राजापि सप्ताहात् त्रिदिवं गतः ।
अहं च लक्ष्मणश्चापि वनस्थौ मातृतुष्टये ॥ ५६ ॥
भरतो मातुलकुले शत्रुघ्नेन सहावसत् ।
वसिष्ठाद्या महाराजसंस्कारे पुत्रवर्जिताः ॥ ५७ ॥
भरतं मातुलकुलादानाय्यैव सहानुजम् ।
भरतेनाथ तत् सर्वं यदुक्तं साम्परायिकम् ॥ ५८ ॥

नृपतेर्यायजूकस्य सर्वं तद् विनिवृत्य च ।
भरतं चोदयामासू राज्यपालनकर्मणि ॥ ५९ ॥
भरतोऽपि शुचा युक्तः प्राज्ञः पूर्वानुगो वशी ।
राज्यार्हो राम एवैको ज्येष्ठः श्रेष्ठगुणान्वितः ॥ ६० ॥
अहं च लक्ष्मणश्चैव शत्रुघ्नोऽस्यानुचारिणः ।
तमानयामि राज्यार्हं गत्वाहं दण्डकान् प्रति ॥ ६१ ॥
इत्युक्त्वा स वसिष्ठाद्यैर्मातृभिस्तिसृभिः सह ।
पौरैर्जानपदैश्चापि मामेत्योक्त्वा पितुर्मृतिम् ॥ ६२ ॥
ततः कृतोदकं मां तु मातृभिश्च द्विजैः सह ।
अभ्यर्थयत् स मां चासौ राज्यपालनकर्माणि ॥ ६३ ॥
अब्रवं पितुरानृण्यमवेक्ष्याहं च नेत्यमुम् ।
यदि नेच्छसि राज्यं त्वं प्रायेणाङ्गमिदं त्यजे ॥ ६४ ॥
इत्युक्त्वा स तदा भूमौ शिश्ये प्रायोपवेशनम् ।
तदाहमृषिभिः सर्वैर्बोधितोऽपि न चालितः ॥ ६५ ॥
भरतं चाब्रवं भक्तं पितुरानृण्यकाङ्क्षया ।
'पूजनीयः पिता ते स्यान्ममापि कुलनन्दन ॥ ६६ ॥
पितुराज्ञामनुल्लङ्घ्य चतुर्दश समास्त्विह ।
नीत्वा पञ्चदशेऽब्दे तु त्वामेष्याम्यादिमे दिने ॥ ६७ ॥

तावन्मत्पादुका चेयं भवेद् राज्यधुरन्धरा ।
तस्मान्मत्पादुकायुक्तो गच्छायोध्यामितो द्रुतम् ॥६८॥
इत्युक्तो भरतो नैव गन्तुमुत्सहते यदा ।
रक्षोवधार्थमृषयः प्रोचुस्तं देवचोदिताः ॥६९॥
सदासौ सत्यवाग् रामो न सत्याच्चलितुं क्षमः ।
अनुल्लङ्घ्या गुरोराज्ञा पितृतुल्यस्य चास्य ते ॥७०॥
तदाज्ञां शिरसा धृत्वा याहि सङ्गृह्य पादुकाम् ।
स सत्यवचनो रामो यथोक्तं हि करिष्यति ॥७१॥
न पापलेशो भविता तदनुज्ञागते त्वयि ।
तदाज्ञालङ्घने दोषो महांस्ते भविता ध्रुवम् ॥७२॥
तस्मादुत्तिष्ठ भरत याह्ययोध्यामितः प्रभो ।
अस्मद्गिरश्च नोल्लङ्घ्या त्वया कैकेयिनन्दन ॥७३॥
इत्युक्तो भरतस्तैस्तु गौरवान्मयि चाधिकम् ।
विप्रावमानाद् भीतोऽसावनतिप्रीतमानसः ॥७४॥
उत्थाय दर्भशयनात् प्राह सप्रश्रयं वचः ।
त्वं मे पितृसमो राम त्वदाज्ञोल्लङ्घनं न मे ॥७५॥
कदापि तस्मादार्याद्य गच्छामि तव शासनात् ।
भवान् हि सत्यसङ्कल्पो मिथ्यासङ्गादिवर्जितः ॥७६

इति त्वं प्रथितो लोके रामो द्विर्नाभिभाषते ।
यदि पञ्चदशेऽब्देऽह्नि प्रथमे त्वां सलक्ष्मणम् ॥ ७७ ॥
सीतया सहितं वीरं नेक्षे सत्यप्रतिश्रवम् ।
ज्वालामालाकुलं वह्निं प्रवेक्ष्यामि तदा ध्रुवम् ॥ ७८ ॥
इदं सत्यं मम वचो नानृतं वच्मि ते पुरः ।
इत्युक्त्वा मां प्रणम्याथ मयाश्लिष्टो मुहुर्मुहुः ॥ ७९ ॥
मत्पादुके समादाय धृत्वैव शिरसा ततः ।
ययौ स भरतोऽयोध्यां प्रेषितः सादरं मया ॥ ८० ॥
पादुके पुरतः कृत्वा नन्दिग्रामे वसन् बहिः ।
गोमूत्रयावकाहारो भरतः स्थण्डिलेशयः ॥ ८१ ॥
प्रतीक्षते च मां नित्यं गणयन् दिवसानपि ।
अहं च राक्षसान् हत्वा रावणादीन् सुरार्चितः ॥ ८२ ॥
दिनानि गणयन्नेव यास्येऽयोध्यां सलक्ष्मणः ।
सीतया सहितश्चापि भूमिपुत्र्यातिशुद्धया ॥ ८३ ॥
गताश्चतुर्दश समास्तदन्त्यो दिवसोऽद्य वै ।
श्वः प्रभाते यदि तु मां न पश्यति नृपात्मजः ॥ ८४ ॥
प्रवेक्ष्यति स वै वह्निं भरतः सत्यसङ्गरः ।
नान्यथा तद् भवेन्नूनं मन्निष्ठस्य वचोऽस्य वै ॥ ८५ ॥

ततोऽहमतिवेगेन यास्येऽयोध्यां पितुः पुरीम् ।.
न शक्यं तत्र चागन्तुं नीतिकार्यार्थगौरवात् ॥ ८६ ॥
प्रियः स परमेष्ठी च नितरां मे तपोधन ।
तदर्थनापि न वृथा कार्या चापि मया सदा ॥ ८७ ॥
तस्मात् स सर्वदेवैश्च युक्तोऽयोध्यां समाव्रजेत् ।
युक्तः स्वपरिवारैश्च तथा वारुणपात्रभृत् ॥ ८८ ॥
अयोध्यायां हि भविता मम राज्याभिषेचनम् ।
परमेष्ठिकृतं श्लाघ्यं महाचमसगैर्जलैः ॥ ८९ ॥
इत्युक्त्वा तमृषिं शीघ्रं प्रेषयित्वा च राघवः ।
अयोध्यां शीघ्रमागच्छ सहवारुणपात्रकः ॥ ९० ॥
तत्र ते भविता कामः कुरु त्वं मेऽभिषेचनम् ।
इत्यालेख्ययुतं बाणद्वयं शीघ्रगतिं प्रभुः ॥ ९१ ॥
ब्रह्मणे प्रेषयामास भृगोरागमनात् पुरः ।
तदा तौ विशिखौ वेगात् क्रमतो ब्रह्मणः पुरः ॥९२॥
पतित्वा वृत्तमावेद्य लेख्यं दत्त्वा तदा पुनः ।
ब्रह्माणमभिवाद्याथ गत्वा पातालमेव च ॥ ९३ ॥
गङ्गामाकृष्य वेगेन स्वप्रयातेन वर्त्मना ।
भुवमाप्तां ततो गङ्गां सर्वपापप्रणाशनीम् ॥ ९४ ॥

पापनाशेति विख्यातां ब्रह्मणेऽस्मै प्रदाय च ।
तौ बाणावतिवेगेन रामसान्निध्यमाप्य च ॥ ९५ ॥
मानितौ तेन रामेण प्राभूतामिषुधिस्थितौ ।

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये

षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः ।

पातालाद् बाणयुग्मेन समाकृष्टा तु जाह्नवी ।
जनार्दनस्य पुरतो दृश्यते बुद्बुदाकृतिः ॥ १ ॥
पूर्णपात्रस्थिता गङ्गा वरुणास्यादिभिः सह ।
एवं चतुर्धा गङ्गेयं वल्कलेऽत्र स्थिता शुभा ॥ २ ॥
चक्रतीर्थं बुद्बुदाख्यं तथा पापविनाशनम् ।
पूर्णपात्रस्थिता गङ्गा चक्ररूपात्र वल्कले ॥ ३ ॥
मिलिता सैकदा त्वब्धिं जेष्यामीति व्यचिन्तयत् ।
महाप्रवाहसंयुक्ता महाघोषा भयङ्करा ॥ ४ ॥
ब्रह्मणो यजमानस्य यज्ञशालां प्रविश्य च ।
समाप्लाव्याब्धिमाप्याथ क्षोभयामीति निश्चयात् ॥ ५ ॥

समापतन्तीमालोक्य समुद्रः सरितां पतिः ।
तद्वेगं च समालोक्य भीतो ब्रह्माणमेव च ॥ ६ ॥
प्राह गङ्गा चतुर्धेयमेकीभूतातिवाहिनी ।
त्वद्यज्ञशालामपि मां प्लावयिष्यति नान्यथा ॥ ७ ॥
अत्र युक्तं विधेहि त्वं कुरु मत्पालनं विभो ।
इति विज्ञापितो देवः समुद्रेणाब्जसम्भवः ॥ ८ ॥
तदाग्निमादिशत् कौण्डं तदाधिक्याधिशोषणम् ।
कुरुष्वान्तर्गतो भूत्वा यथा स्यात् पूर्ववत् स्थितिः ॥ ९ ॥
इत्युक्तो ब्रह्मणा तेन हव्यवाहो दिवौकसाम् ।
मुखं स बडबारूपं यथाब्धिं चापि शोषयेत् ॥ १० ॥
तथा कृत्वा विधेराज्ञां पुरस्कृत्य प्रविश्य ताम् ।
शोषयामास शीघ्रेण यथा सा पूर्ववद् भवेत् ॥ ११ ॥
ततः सविस्मयोऽब्धिश्च सञ्जातो निर्भयस्तदा ।
ततश्चक्रादागतेयं गङ्गा परमभास्वरा ॥ १२ ॥
स्वल्पप्रवाहा खिन्नेव यदाभूत् तां विलोक्य च ।
तया सम्प्रार्थितो ब्रह्मा वरं चास्यै ददौ मुदा ॥ १३ ॥
स्वल्पप्रवाहानुदिनं पर्वकाले बहूदका ।
मद्देवयजनोद्भूता सागरं सङ्गमिष्यसे ॥ १४ ॥

त्वदब्धिसङ्गमे तत्र ये स्नास्यन्ति नरा.भुवि ।
तेषां च न पुनर्जन्म भवत्यमृतमाप्नुयुः ॥ १५ ॥
इति तस्यै वरं दत्त्वा ब्रह्मा लोकपितामहः ।
चतुर्विधात्र या गङ्गा गङ्गया चमसस्थया ॥ १६ ॥
सहितात्र यदास्ते सा सर्वलोकैकपावनी ।
षट्षष्टिकोटितीर्थानि गङ्गासी वरुणा तथा ॥ १७ ॥
वसन्ति यत्र सहितास्तद्देवयजनस्थले ।
तन्महाचमसं पात्रमुद्धृत्य द्रुतमेव हि ॥ १८ ॥
प्रयातव्याद्य नगरी सायोध्याद्भुतकर्मणः ।
रामस्य देवदेवस्य चिन्तयित्वेति देवताः ॥ १९ ॥
ब्रह्मरुद्रेन्द्रपूर्वाश्च चक्रुरद्यममञ्जसा ।
तदा च गमनोद्युक्ताः ब्रह्मरुद्रेन्द्रपूर्वकाः ॥ २० ॥
त्वरया ते सुराः सर्वे चमसस्थलमागताः ।
गन्तुकामास्तदायोध्यां महाचमसमेव ते ॥ २१ ॥
नेतुं रामाभिषेकार्थं तदुद्धरणमादधुः ।
न शक्यते यदोद्धर्तुं सर्वैरपि सुरेश्वरैः ॥ २२ ॥
मोघाशा मोघवीर्याश्च सुराः सर्वेऽपि चिन्तया ।
ब्रह्माणं यजमानं तमब्रुवन् विस्मयान्विताः ॥ २३ ॥

चालयित्वा मन्दरोऽपि धृत्वानीतः पुरा सुरैः ।
सर्वतीर्थमयं चेदं महाचमसमद्य तु ॥ २४ ॥
न चालयितुमुद्धर्तुं शक्यते सकलैः सुरैः ।
दृष्टमत्र प्रमाणं त्वं न स्वतन्त्रा हि पूरुषाः ॥ २५ ॥
कथं वा कार्यमस्माभिः किं वा ब्रूहि पितामह ।
रामाभिषेकावसरो नातिवर्तेत वै यथा ॥ २६ ॥
तथा विधीयतां यत्नो नैव चास्य समो भुवि ।
इति सञ्चिन्त्य ते सर्वे चमसोद्धरणाक्षमाः ॥ २७ ॥
रामाभिषेककालस्य प्राप्तत्वाच्च ससम्भ्रमाः ।
महाचमसपात्रस्थं सर्वतीर्थमयं शुभम् ॥ २८ ॥
विधिवन्मन्त्रपूतं च वरुणासीमयं शुभम् ।
तत् तीर्थं तत उद्धृत्य पात्रान्तरसुसम्भृतम् ॥ २९ ॥
कृत्वातिशीघ्रं नेष्यामो रामस्यास्याभिषेचने ।
कृतकृत्यस्तथा वेधा वयं च सुखिनस्तथा ॥ ३० ॥
इति निश्चित्य ते देवाः सर्वे शक्रपुरोगमाः ।
पूर्णपात्रे वारुणाख्ये महाचमससंज्ञिते ॥ ३१ ॥
संस्थितं पुण्यतीर्थं तत् तदा चोदधरन् द्रुतम् ।
पात्रान्तरे चोद्धरण्या गृहीत्वा समपूरयन् ॥ ३२ ॥

तदा तत्पात्रगा गङ्गा वरुणास्यादिसंयुता.।
ववृधे चात्र वेगेन सर्वेषां भीतिदा द्रुतम् ॥ ३३ ॥
तस्या वेगं तदा दृष्ट्वा विषण्णेषु सुरेष्वथ ।
चोदितो ब्रह्मणा चाथ देवेन ऋषिसत्तमः ॥ ३४ ॥
कौण्डिन्यो नाम ब्रह्मर्षिर्हनूमानिव पर्वतम् ।
समानयन्महापात्रं गिरिं स च तदा द्रुतम् ॥ ३५ ॥
पूरयित्वा गिरिं चापि प्रोक्षितं पुण्यमद्भुतम् ।
तीर्थजातं समागृह्य प्रतस्थुस्ते सुरास्ततः ॥ ३६ ॥
द्रुतं रामाभिषेकार्थमयोध्यानगरं गताः ।
ब्रह्मादयः सुराः सर्वे पूर्णसन्तोषसम्भृताः ॥ ३७ ॥
दृष्ट्वायोध्यां पुरीं रम्यां राघवान्वयवर्धनीम् ।
प्रविश्य देवैः सहितो ब्रह्मा प्राप्य रघूत्तमम् ॥ ३८ ॥
सीतया लक्ष्मणेनापि भरतेनानुजेन च ।
सेव्यमानमुदाराङ्गं सुन्दरास्यं शुचिस्मितम् ॥ ३९ ॥
इन्दीवरदलश्यामं पद्मपत्रायतेक्षणम् ।
सुनासं कुन्ददन्तं च विद्रुमाधरशोभितम् ॥ ४० ॥
कम्बुकण्ठं सुविस्तीर्णहृदयं श्रीसमाश्रयम् ।
विश्वाश्रयोदरं निम्ननाभिं पीताम्बरावृतम् ॥ ४१ ॥

समवृत्तोरुयुगलराजमानं सुजानुकम् ।
क्रमवृत्तसुजङ्घाङ्घ्रिपद्मसंशोभितं शुभम् ॥ ४२ ॥
त्रिलोकीपरमानन्दमिन्दिरानन्दमन्दिरम् ।
स्वनामस्मरणेनैव सर्वपापापहारिणम् ॥ ४३ ॥
दृष्ट्वा रामं महाबाहुं ब्रह्मा देवैः समन्वितः ।
विज्ञाप्य सर्वं तद् वृत्तं रामाय परमात्मने ॥ ४४ ॥
षट्षष्टिकोटितीर्थासीवरुणातीर्थसंश्रितम् ।
महाचमसगं पुण्यमेतत् तीर्थं सुपावनम् ॥ ४५ ॥
महाराज महाबाहो राम राजाधिराज ते ।
स्यादेतदभिषेकार्हं साम्राज्याय च सुक्रतुः ॥ ४६ ॥
भवेन्मम कृते स्वामिन् कृपयाङ्गीकुरुष्व भोः ।
इत्युक्तस्तेन रामोऽपि मन्दस्मितमुखाम्बुजः ॥ ४७ ॥
विधेर्वक्राब्जमालोक्य प्राहेदं परमेश्वरः !
चतुर्दश जगन्ति त्वं सृष्ट्वा च तदधीश्वरः ॥ ४८ ॥
तत्तत्पदेषु शक्रादीनभिषिच्य नियोक्ष्यसि ।
काश्यपिं मामुपेन्द्रं हि यौवराज्ये पुरा विधे ॥४९॥
भवांस्त्रिलोकीसाम्राज्ये महाप्रीत्याभिषिक्तवान् ।
बलिर्बन्धाविनिर्मुक्तः सुतले स्वर्गतोऽधिके ॥ ५० ॥

चिरं निस्तुलसाम्राज्ये प्रहृष्टेन मया सह ।
अभिषिक्तस्त्वया ब्रह्मंस्तथा लोकत्रयाधिपः ॥ ५१ ॥
वासवश्चाभिषिक्तोऽभूदभिषिक्तस्त्वया हि यः ।
स दीर्घसम्पन्निलयो भविता ननु पद्मज ॥ ५२ ॥
त्वयाभिषेकः कार्यो मे चिरसम्पद्विवृद्धये ।
तवेष्टमपि कार्यं मे सर्वदा कमलासन ॥ ५३ ॥
मत्प्रियाद् वल्कलक्षेत्रादानीतैः पुण्यवर्धनैः ।
अभिषेचय मामत्र त्वमेवाद्य पितामह ॥ ५४ ॥
मा विलम्बो भवेदत्र त्वत्प्रीतिः स्याद् द्रुतं विधे ।
इत्याज्ञप्तः स रामेण सन्तुष्टः पद्मसम्भवः ॥ ५५ ॥
वसिष्ठादीन् मुनिवरान् पुरस्कृत्य वरासने ।
स्वर्णरत्नमये पीठे श्रीरामं सह सीतया ॥ ५६ ॥
उपवेश्याभिषेकार्थं महाचमससम्भृतैः ।
पुण्यतीर्थैः समानीतैः स्वर्णकुम्भसहस्रकैः ॥ ५७ ॥
सुमुहूर्ते विधिर्भक्त्या श्रीरामं सीतया सह ।
समभ्यषेचयत् प्रीत्या पवित्रैरपि पञ्चभिः ॥ ५८ ॥
महाभिषेकविधिना चासीत् पूर्णमनोरथः ।
अभिषिक्तस्तदा रामो दिव्यपीताम्बरावृतः ॥ ५९ ॥

किरीटाग्र्येण रत्नाग्र्यराजितेन विभूषितः ।
हारनूपुरकेयूरकटकादिपरिष्कृतः ॥ ६० ॥
सिंहासने भद्रपीठे स्वासीनः सीतया सह ।
वन्दिभिश्च स्तूयमानो रक्षोवानरनागरैः ॥ ६१ ॥
विभीषणेनाङ्गदेन सुग्रीवेण हनूमता ।
अनुजैर्लक्ष्मणाद्यैश्च सेव्यमानो मुदम्भरैः ॥ ६२ ॥
पौरैर्जानपदैश्चापि सानन्दं वीक्षितो मुदा ।
शिवशक्रादिभिर्देवैः पश्यद्भिस्तन्महोत्सवम् ॥ ६३ ॥
सादरं सेव्यमानश्चाप्यप्सरोभिः समन्ततः ।
पारमेष्ठ्यश्रिया पूर्णः श्रीरामः परमेष्ठिनम् ॥ ६४ ॥
प्राहातिभक्तिभरितं समवाप्तमनोरथम् ।
कयापि चेहया युक्तमिव ज्ञात्वा रघूत्तमः ॥ ६५ ॥
रत्नमालां हनुमते सीतया दापयन् मुदा ।
चतुर्मुखमभिप्रेक्ष्य प्राह प्रहसिताननः ॥ ६६ ॥
ब्रह्मन् विज्ञाय ते चित्तं त्वामहं पूर्वमागतः ।
जनार्दनोऽहं विप्रात्मा नित्यतृप्तोऽप्यतृप्तिमान् ॥ ६७ ॥
त्वं मामतर्पयस्तत्र सर्वकर्मफलार्पणात् ।
त्वया चाभ्यर्चितस्तत्र निवसामि निरन्तरम् ॥ ६८ ॥

तवैव देवयजनक्षेत्रे वल्कलसंज्ञिते ।
क्षेत्राणामुत्तमे तस्मिन् पुण्यक्षेत्रे पितामह ॥ ६९ ॥
वाराणस्याः कोटिगुणं क्षेत्रं परमपावनम् ।
ममातिहृद्यं सततं त्वं गत्वाद्य पितामह ॥ ७० ॥
क्रतुं समाप्य विधिवत् पूर्णपात्रस्थगङ्गया ।
पर्वसंवृद्धयास्यात्र संस्पृष्टे वरुणालये ॥ ७१ ॥
विधेह्यवभृथं तत्र तीर्थानामुत्तमोत्तमे ।
तत्र स्थितं च मां दृष्ट्वा जनार्दनवपुर्धरम् ॥ ७२ ॥
मम हस्ते क्रतुफलं समर्प्य विधिवद् विधे ।
कृतकृत्योऽसि भद्रं ते याहीतो वल्कलस्थलम् ॥ ७३ ॥
ममैवातिप्रियतमं सर्वसम्पत्समृद्धिदम् ।
समस्तपापगुल्मौघदहनं मुक्तिदं सदा ॥ ७४ ॥
ततः सत्यं समासाद्य सृष्ट्वा विश्वं च वर्धय ।
ततोऽहं त्वामुपेष्यामि किञ्चित्कालान्तरे विधे ॥ ७५ ॥
श्रीह्रीसमाख्ययायुक्तसीतया सह पद्मया ।
इत्युक्तः स तदा ब्रह्मा रामेणाक्लिष्टकर्मणा ॥ ७६ ॥
वल्कलक्षेत्रमागत्य क्रतुशेषं समाप्य च ।
युक्ते वरुणयास्या च गङ्गया पर्ववृद्धया ॥ ७७ ॥

चक्रे चावभृथं ब्रह्मा दक्षिणाम्बुनिधौ मुदा ।
सर्वे लोकाश्च देवाश्च दक्षिणाम्बुनिधौ तदा ॥ ७८ ॥
संयुक्ते गङ्गया तत्र चतुर्मुख्या च पर्वणि ।
ब्रह्मणोऽवभृथस्थाने सर्वपापापनोदने ॥ ७९ ॥
सस्नुः पुण्यतमे तीर्थे गङ्गासागरसङ्गमे ।
सर्वतीर्थमये पुण्ये क्षेत्रेऽस्मिन् वल्कलाभिधे ॥ ८० ॥
तदा दुन्दुभयो नेदुः खात् पेतुः पुष्पवृष्टयः ।
जगुर्गन्धर्वमुख्याश्च ननृतुश्चाप्सरोगणाः ॥ ८१ ॥
स्तुवन्ति तत्र ब्रह्माणं चरितार्थं तु वन्दिनः ।
ततो विधिः समाहूय देवानाहात्र सादरम् ॥ ८२ ॥
इदं पुण्यतमं क्षेत्रं क्षेत्राणामुत्तमोत्तमम् ।
वल्कलाख्यं महापुण्यं मद्देवयजनं शुभम् ॥ ८३ ॥
जनार्दनोऽपि यत्रास्ते सर्वदेवेश्वरो हरिः ।
विशेषतोऽनुगृह्णाति पिप्पलच्छाययावृतः ॥ ८४ ॥
दर्शनान्मुक्तिदो नृणां सर्वकर्मफलार्चितः ।
पुण्यक्षेत्रेषु सर्वेषु क्रतवोऽपि मया कृताः ॥ ८५ ॥
क्वापि नैतादृशीमृद्धिं पश्यामि हरितोषिणीम् ।
अहं त्वनुगृहीतोऽस्मि रामेण नितरां सुराः ॥ ८६ ॥

सोऽयं जनार्दनात्मात्र ममानुग्रहमाचरन् ।
मद्देवयजनक्षेत्रं वल्कलाख्यं हि पावनम् ॥ ८७ ॥
स्वनाम्ना ख्यापयन् भूमौ चतुर्मुख्या च गङ्गया ।
पूर्णपात्रस्थया पापविनाशिन्या च पुण्यया ॥ ८८ ॥
चक्रतीर्थाख्यया चक्राकृष्टयात्र रसातलात् ।
सर्वपापप्रणाशिन्या गङ्गया बुद्बुदाख्यया ॥ ८९ ॥
सर्वदेवमयाश्वत्थच्छाययात्यन्तपावनम् ।
क्षेत्रप्रख्यापकं यत्र प्रेषितं नारदेन यत् ॥ ९० ॥
वल्कलं मार्गसन्दर्शं प्रजेशानां पुराभवत् ।
वल्कलायामविस्तारं तत् क्षेत्रं प्रथितं भुवि ॥ ९१ ॥
वल्कलक्षेत्रमित्येव प्रीत्या देवो जनार्दनः ।
स्वनाम्ना ख्यापयामास जनार्दनमिति प्रभुः ॥ ९२ ॥
अत्र यद्यत् कृतं कर्म जनार्दनकरेऽर्पितम् ।
अक्षयं भविता नूनं क्षेत्रस्यास्य प्रभावतः ॥ ९३ ॥
पितृणां तुष्टिरतुला भवत्यस्मिन् जनार्दने ।
कर्मणा स्वर्पितेनापि निर्वापप्रमुखेन च ॥ ९४ ॥
श्राद्धादिभिश्च सुखिता मुक्ताश्च पितरोऽत्र वै ।
अत्र स्नातस्य मर्त्यस्य गङ्गासागरसङ्गमे ॥ ९५ ॥

न पापबन्धस्तस्यास्ति स विमुक्तो भवेन्नरः ।
महापातकयुक्तोऽपि स्नात्वा मुच्येत पातकैः ॥ ९६ ॥
यूयं रामाभ्यनुज्ञातास्तमेवात्र जनार्दनम् ।
निषेव्याशु स्वलोकांश्च प्रयात प्रमुदान्विताः ॥ ९७ ॥
सत्यलोकमितश्चाहं प्राप्य देवानुशासनम् ।
यथोक्तं हि चरिष्यामीत्युक्त्वा तैर्विबुधैर्युतः ॥ ९८ ॥
जनार्दनं तं नत्वा च स्तुत्वा च विविधैः स्तवैः ।
तेन चाप्यभ्यनुज्ञातः सत्यलोकं ययौ विधिः ॥ ९९ ॥
स्वं स्वं स्थानं सुराः प्राप्य यथापूर्वं समास्थिताः ।
एतादृशप्रभावं तद् वल्कलक्षेत्रमुत्तमम् ॥ १०० ॥
लेशतो महिमा चास्य प्रोक्तो भूसुरसत्तमाः ।
सर्वं वक्तुमनन्तोऽपि न शक्त इति मे मतिः ॥ १०१ ॥
जनार्दनस्य रामस्य चरितं परमाद्भुतम् ।
वल्कलक्षेत्रसम्भूतिं श्रुत्वा पापैर्विमुच्यते ॥ १०२ ॥

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये

सप्तमोऽध्यायः ।

अथाष्टमोऽध्यायः ।

ऋषय ऊचुः—

सूत सूत चिरं जीव श्रुतमेतत् सुखावहम् ।
वल्कलक्षेत्रमाहात्म्यमत्याश्चर्यं सुपावनम् ॥ १ ॥
इदानीं श्रोतुमिच्छामः क्षेत्रयात्राविधिं शुभम् ।
को विधिः क्षेत्रयात्रायाः किं कार्यं क्षेत्रमागतैः ॥ २ ॥
नियमो वा कथं तत्र ब्रूहि सर्वमशेषतः ।

श्रीसूत उवाच—

शृणुध्वमृषयः सर्वे विधिं तत्र जनार्दने ॥ ३ ॥
यात्रापैर्नरैः कार्यान् नियमांश्च विशेषतः ।
देवर्षिपितृसम्बन्धिऋणान्मुक्तिमभीप्सुना ॥ ४ ॥
पुरुषेण ध्रुवं कार्या यात्रा क्षेत्रे जनार्दने ।
पूर्वेद्युरेव सङ्कल्प्य देवर्षिपितृकाद् ऋणात् ॥ ५ ॥
मुक्त्यर्थं वल्कलक्षेत्रयात्रां प्रीत्यै करोम्यहम् ।
जनार्दनस्य देवस्य निर्विघ्नं विदधातु मे ॥ ६ ॥
इति सम्प्रार्थ्य देवेशं भोजयित्वा द्विजोत्तमान्
भुक्तवद्भिर्द्विजैरेवाभ्यनुज्ञातो व्रजेत् ततः ॥ ७ ॥

साग्निहोत्रः सपत्नीक एकभोजी जितेन्द्रियः ।
प्रातः स्नात्वा तु सवनं कृत्वा सन्ध्यादिकर्म च ॥ ८ ॥
जनार्दनस्य माहात्म्यं शृण्वंस्तन्नामजापकः ।
वैदिकैः स्तोत्रमुख्यैश्च स्तुवन् देवं जनार्दनम् ॥ ९ ॥
गत्वा योजनमात्रं तु दुष्टसंसर्गवर्जितः ।
सह भागवतैः शुद्धैर्हरिध्यानपरायणैः ॥ १० ॥
संयतो जितषड्वर्गो वृथालापविवर्जितः ।
पुण्यस्थानेऽवतीर्याथ मध्याह्नात् पूर्वमेव तु ॥ ११ ॥
स्नानं माध्याह्निकं कृत्वा कृत्वा नैमित्तिकाः क्रियाः ।
विधिवद् देवमभ्यर्च्य सर्वं तस्मै निवेद्य च ॥ १२ ॥
सन्तर्प्य देवर्षिपितॄन् पञ्च यज्ञान् विधाय च ।
आतिथ्यायागतांस्तत्र तर्पयित्वा स्वशक्तितः ॥ १३ ॥
स्वयं भुञ्जीत मौनेन जनार्दनमनुस्मरन् ।
हरिलीलाकथाभिश्च शेषकालं नयन् पुनः ॥ १४ ॥
सन्ध्यां सायन्तनीं कृत्वा सायमौपासनं तथा ।
यामं नीत्वा तथा कालं निद्रया प्रहरद्वयम् ॥ १५ ॥
नीत्वोत्थाय पुरा यामात् स्मृत्वा देवं जनार्दनम् ।
मृज्जलाभ्यां बहिः शौचं कृत्वा गण्डूषतः शुचिः ॥ १६ ॥

दन्तशुद्धिं विधायाथ स्नात्वा चाप्यरुणोदये ।
प्रातः सन्ध्यादि निर्वर्त्य ततो यात्रां विनिर्दिशेत् ॥१७॥
एवं त्वहरहः कुर्वन् प्राप्य क्षेत्रं जनार्दनम् ।
समस्तपापापनुदं क्षौरकर्म समाचरेत् ॥ १८ ॥
स्नात्वा च चक्रतीर्थे तु विप्रानुज्ञामवाप्य च ।
क्षेत्रोपवासं कुर्वीत ध्यात्वा देवं जनार्दनम् ॥ १९ ॥
मुण्डनं चोपवासं च तीर्थपिण्डं परेऽहनि ।
कुर्यात् पितॄणां तृप्त्यै च मुक्त्यै तेषां विशेषतः ॥२०॥
ततः पर्वण्युपावृत्ते स्नात्वा गङ्गाब्धिसङ्गमे ।
सर्वतीर्थमये पुण्ये वरुणास्यादिसंयुते ॥ २१ ॥
पूर्णपात्रनिधानेऽद्रिमाप्लाव्याब्धिमुपागते ।
स्मृत्वा जनार्दनं देवं गङ्गां तत्पादसम्भवाम् ॥ २२ ॥
तामेवाब्धिसमासक्तां ब्राह्मणो नियमान्वितः ।
पर्वकालेऽतिसंवृद्धां सर्वपापापहारिणीम् ॥ २३ ॥
स्मृत्वा स्नात्वाथ सन्तर्प्य देवर्षिपितृदेवताः ।
पिण्डान् सक्तुमयांस्तत्र निर्वपेच्छ्राद्धपूर्वकम् ॥ २४ ॥
हिरण्येनाथवामेन श्राद्धं कुर्याच्च तर्पणम् ।
पितॄणामपि पिण्डांश्च सकारुण्ययुतात्मनाम् ॥ २५ ॥

आदौ पिता तथा माता सपत्नी जननी तथा ।
मातामहाः सपत्नीका आत्मपत्न्यस्ततः परम् ॥ २६ ॥
सुतभ्रातृपितृव्याश्च मातुलाः सहभार्यकाः ।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः ॥ २७ ॥
पितृमातृष्वसारौ च श्वशुरः स्यालको गुरुः ।
आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ॥ २८ ॥
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ २९ ॥
आब्रह्मभवनाल्लोकादिदमस्तु तिलोदकम् ।
ये के चास्मत्कुले जाता अपुत्रा गोत्रजा मृताः ॥३०॥
ते गृह्णन्तु मया दत्तमिदमत्र तिलोदकम् ।
तर्पयित्वा पितॄनेवं स्मृत्वा देवं जनार्दनम् ॥ ३१ ॥
दद्याद् दानं ततो भक्त्या मनसा यद्यदीप्सितम् ।
गोदानं चैव भूदानं कन्यादानं विशेषतः ॥ ३२ ॥
हिरण्यदानं कुर्वीत भूरिदानं तथैव च ।
रत्नदानं वस्त्रदानं क्षेत्रारामगृहाणि च ॥ ३३ ॥
दद्याज्जनार्दनप्रीत्यै पितॄणां मुक्तिहेतवे ।
यद्यद् दानं तदा दत्तं तदक्षयफलं भवेत् ॥ ३४ ॥

ततः पापविनाशे च बुह्नदे चक्रतीर्थके ।
स्नात्वा जनार्दनं देवं नत्वा स्तुत्वा च भक्तितः ॥३५॥
ब्राह्मणान् भोजयेदन्नैर्मृष्टैः षड्रससंयुतैः ।
पायसैर्घृतसंमिश्रैर्भक्ष्यैर्नानाविधैरपि ॥ ३६ ॥
दक्षिणां चैव ताम्बूलं दत्त्वा तेभ्योऽतिभक्तितः ।
सन्तुष्टैस्तैर्विप्रवरैराशीर्भिरभिवर्धितः ॥ ३७ ॥
भुञ्जीत तैरनुज्ञातस्तत्तत् सर्वं जनार्दने ।
समर्पायित्वा तत्रैव निवसेत् पञ्चरात्रकम् ॥ ३८ ॥
त्रिरात्रमपि वा तत्र वसित्वाथ जनार्दनम् ।
नत्वा स्मृत्वाभ्यनुज्ञातः पुनरावृत्य चाव्रजेत् ॥ ३९ ॥
एवं यात्रामहं भक्त्या विधानेनापि संयुतः ।
जनार्दनस्य देवस्य यः करोति प्रसन्नधीः ॥ ४० ॥
तस्य सर्वाणि पापानि पूर्वजन्मकृतान्यपि ।
नश्यन्ति सर्वदा पुण्ये मतिरस्योपजायते ॥ ४१ ॥
अशक्तो वल्कलक्षेत्रयात्रायां पुरुषः किल ।
श्राद्धादिसमये देवं जनार्दनमनुस्मरन् ॥ ४२ ॥
तदर्पणं च तत् कर्म कुर्वंस्तत्फलमश्नुते ।
याः प्रसिद्धाः पुराणेषु नगर्यो मुक्तिदायकाः ॥ ४३ ॥

अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
श्रीरङ्गं द्वारका श्रीमदनन्तशयनं गया ॥ ४४ ॥
श्रीमुष्णं वेङ्कटाद्रिश्च सालग्रामश्च नैमिशम् ।
तोदाद्रिः पुष्करं चैव नरनारायणाश्रमः ॥ ४५ ॥
एवमादिषु पुण्येषु पितॄन् भक्त्या यजन्ति ये ।
जनार्दनार्पणेनैव फलभाजो भवन्ति ते ॥ ४६ ॥
अन्यथा निष्फलं ज्ञेयमपि श्रद्धादिबृंहितम् ।
किमत्र बहुनोक्तेन कर्मसाफल्यकामुकः ॥ ४७ ॥
निखिलं हव्यकव्यादि तस्मै भक्त्या समर्पयेत् ।
एवं यः कुरुते मर्त्यो भक्तिश्रद्धासमन्वितः ॥ ४८ ॥
श्रीदेवी तद्गृहे नित्यं सम्पदश्च निरन्तरम् ।
ततोऽवाप्य महाभक्तिं देवदेवे जनार्दने ॥ ४९ ॥
ज्ञात्वा तं सर्वकर्तारं स्वतन्त्रमपि चोत्तमम् ।
अक्षराच्च क्षराच्चैव जगतोऽस्माज्जगन्मयम् ॥ ५० ॥
सृष्टिस्थित्यादिकर्तारमव्ययं जगतः परम् ।
अन्तर्बहिश्च संविष्टमन्तर्यामिणमीश्वरम् ॥ ५१ ॥
ज्ञात्वा गुरुप्रसादेन ब्रह्म नारायणं हरिम् ।
सभुपास्य यथायोग्यं दृष्ट्वा देवं जनार्दनम् ॥ ५२ ॥

तस्य प्रसादाद् वैकुण्ठं लभते नात्र संशयः ।
तस्माज्जनार्दनस्यास्य महिमा केन वर्ण्यते ॥ ५३ ॥
यो वा को वात्र गणयेत् पार्थिवानि रजांस्यपि ।
विष्णोर्जनार्दनस्यास्य महिमा नैव गण्यते ॥ ५४ ॥
य इदं शृणुयान्नित्यं श्रावयेच्च पठेदपि ।
स चोद्धृत्य पितॄन् सर्वान्मुच्यते सर्वपातकैः ॥ ५५ ॥
पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां कामार्थी काममाप्नुयात् ॥५६॥
किमत्र बहुनोक्तेन मोक्षार्थी मोक्षमाप्नुयात् ।
भक्तायैतत् प्रकाश्यं स्यान्नाभक्ताय कदाचन ॥ ५७ ॥
नैवाप्यविष्णुभक्ताय विष्णोर्माहात्म्यमुत्तमम् ।
जनार्दनस्य माहात्म्यं लिखित्वा भक्तिपूर्वकम् ॥५८॥
सद्यो द्विजेभ्यो यो दद्यात् स ज्ञानं मुक्तिमाप्नुयात् ।
लिखितं पुस्तकं वापि गृहे तिष्ठति यस्य वै ॥ ५९ ॥
तद् गृहं तु कुरुक्षेत्रं तत्र तिष्ठति वै हरिः ।
जनार्दनस्य देवस्य माहात्म्यमिदमद्भुतम् ॥ ६० ॥
श्रवणात् सर्वपापघ्नमुक्तं वो द्विजसत्तमाः ।
अहं चापि कृतार्थोऽस्मि विष्णोर्माहात्म्यकीर्तनात् ॥६१॥

सत्सङ्गश्चेदिन्द्रियाणां कुरुते सर्वसम्पदः ।
इत्युक्तास्ते महाभागा ऋषयस्तु तपोधनाः ॥ ६२ ॥
सन्तोषमतुलं प्राप्य सर्वकर्मसमर्पणम् ।
समर्पयन्तो देवेशे ब्रह्मण्यस्मिन् जनार्दने ॥ ६३ ॥
सन्तुष्टचित्तास्ते सर्वे सूतं संमान्य भक्तितः ।
जनार्दनन्यस्तचित्ताः पूर्ववत् सत्रमासत ॥ ६४ ॥

इति श्रीब्रह्माण्डपुराणे श्रीवल्कलक्षेत्रमाहात्म्ये

अष्टमोऽध्यायः ।

समाप्तं च श्रीमद्वल्कलक्षेत्रमाहात्म्यम् ।

शुभं भूयात् ।

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE,
84, R.H. ROAD, MADRAS-4

श्रीमद्रजतपीठपुरमाहात्म्यम्

(उडुपिक्षेत्रमाहात्म्यम्)

अस्य हि जगत्प्रसिद्धस्य रजतपीठापरपर्यायरौप्यपीठक्षेत्रस्य माहात्म्यं देवनागरलिपिभिः बेळगांव-रामतत्त्वप्रकाशिकायां, तथा कर्णाटकलिपिभिर्भाषाव्याख्यानसाहित्येन बेङ्गळूरुनगरपुस्तकशालायां च मुद्रितमपभ्रंशभूयिष्ठमत एव याथातथ्येन क्षेत्रतत्त्वानवबोधक समुद्वीक्ष्य विषीदतां सद्वैष्णवानामभ्यर्थनया यदृच्छया लब्धमतिजीर्णतालपत्रस्थितमिदं माहात्म्यमतिप्रयासेन संशोध्य, बालोपयोगिना **माध्वरहस्याख्येन** लघुना ग्रन्थेन च संयोज्य मुद्रापितम्। अस्मिंश्च माहात्म्ये वैष्णवैरवश्यमवगन्तव्यं **तुळसी-शङ्ख-सालग्राम-अष्टमठाधिप**वृत्तादिकमद्ययावत् प्रायेण बहुजनाविदितं स्पृहणीयया भङ्ग्या प्रदर्श्यते। **माध्वरहस्ये** तु मतप्रतिष्ठापकानां श्रीमन्मध्वाचार्याणां चरित्रं, द्वैतमतस्य तत्त्वज्ञानं च बालोपयोगिन्या सरलया भङ्ग्यानुवर्णितम्। अतिदुर्लभस्यास्य माहात्म्यस्य मूल्यं कलादशकमेव। मुद्रितानां च परिमितानां पुस्तकानां व्ययितमायतया ग्राहकमहाशयैस्त्वरितमेव ग्रहणे प्रयत्न आर्धायताम्। अनन्तशयन जनार्दनक्षेत्र-रजतपीठपुरक्षेत्रमाहात्म्यानि युगपद् ग्रन्थेतृभ्यः पादाधिकैकरूप्यकेण मूल्येन प्रदीयेरन्। प्रेषणव्ययस्तु पृथगेव।

प्राप्तिस्थानम्—

विठ्ठलेत्ताल	पावंजे गुरुराव्
व्यासविलास-कोष्ठमठम्	मध्वसिद्धान्तग्रन्थालयः
चिन्नचाल- अनन्तशयनम्.	उडुपि. S. C.

21157

THE [illegible]

R.F[illegible]

84 R. H. [illegible]